त्क्रुरुमाविरेण ११ इत्यार्षेरामायणेआरण्यकांडेनवमःसर्गः ९ वाक्यमेतत्तवैदेह्याभाषितंभ
र्तृया कृतात्यधर्मेस्थितोरामःप्रत्युवाचाथजानकी १ हितमुक्तंत्वयादेविस्निग्धयासहयाव
वः कुलेव्यपदिशंत्यावधर्मंसेजनकात्मजे २ किमवक्ष्याम्यहंदेवित्वयैवोक्तमिदंवचः त
त्रिपधीयतेचापोनार्तशब्दोभवेदिति ३ ॥

इतिपाठांतरे १ कुलेव्यपदिशंत्या तत्रिपाणांतवीराणामित्यादिनातत्रियकुलधर्मवोधयंत्या २ अतोनरमहंकिंत्रुवक्ष्यामि तयैवोतरंदत्तमित्यर्थः ।
इदंशाहार्थः तत्रियैरिति रतकाभावकृतत्रातीनांशब्दोमाभूदित्यर्थः तत्रियैश्चापोधार्यतेइत्येषोर्थोधत्रुपाकार्यमेतावदात्तीनामभिरक्षणमि

शिवकर्णामृतटीकः ॥ २ ॥

श्री. वा.रा. प्राची २२ 43

तद्वचनमाकर्ण्यैवानुष्ठानकालत्रमाह नैवेति संशितव्रताः तीक्ष्णव्रताः स्वयमागम्य शरणं गता इत्यनेनानाहूतागमनादिदोषपरिहारो व धार्ष्ट्यं प्रवर्ते॥
किं वा मम कारणमागतानां तेषु वैरं ममापि वैरमर्यादापालनमिति निर्वैरवधस्य क्लिनेनमेश्रुके ४ कालकालेषु सर्वकालेषु गृहीतैरिति मस्यवधा
मानाश्चेति शेषः ५ अभ्यवपद्यस्व अनुगृहाणेति मामनूचुः आर्षं परस्मैपदं ७ एवं तेषामेवं तेषां मुखाच्च्युतं वचनं श्रुत्वा वचनशुश्रूषा वचनानुष्ठानलक्षणा

ते चार्ता दण्डकारण्ये मुनयः संशितव्रताः मां सीते स्वयमागम्य शरण्यं शरणं गताः ४ वसन्तः कालकाले
षु वने मूलफलाशनाः न लभन्ते सुखं भीमा राक्षसैः क्रूरकर्मभिः ५ भक्ष्यन्ते राक्षसैर्भीमैर्नरमांसोपजीविभिः
ते भक्ष्यमाणा मुनयो दण्डकारण्यवासिनः ६ अस्मानभ्यवपद्येति मामूचुर्द्विजसत्तमाः मया तु वचनं श्रु
त्वा तेषामेवं मुखाच्च्युतम् ७ कृत्वा वचनशुश्रूषां वाक्यमेतदुदाहृतं प्रसीदन्तु भवन्तो मे ह्रीरेषा तु ममा
तुला ८ यदीदृशैरहं विप्रैरुपस्थेयैरुपस्थितः किं करोमीति च मया व्याहृतं द्विजसन्निधौ ९

शुश्रूषां कृत्वा मनसि कृत्वेत्यर्थः वाक्यशुश्रूषामिति पाठः ८ यदीदृशैः तादृशैरुपस्थेयैः अस्माभिः रक्षणार्थमुपास्यैः स्वयमुपस्थितः रक्षणार्थमिति शेषः एषा
मम प्रह्वीः कान्तिरतः प्रसीदन्त्वित्यर्थः तीव्रत्वपमा मम ह्रीरतः प्रसीदन्त्वित्याह किं करोमि किंकरवाणीत्यर्थः लोडर्थे लडार्षः ९ ॥

५५ सेवैः पर्वसमयोक्तैस्तैः सेवैरित्यर्थः ९ समः नत्रस्तः पीडाविषयेरतातिनिभवच्छवृयोगात्मप्यश्रुतः पर्वकालेषु दर्शपूर्णमासेष्टिकालेषु ॥ धर्मेय
तिश्रमिभवंति १२ गतिज्ञानारे ११ नेनश्रीभतिक्रमाणितनपोव्यपभवत १५ रत्नकस्त्वभवेदितिशेषः वततनाप्योन्तनाश्यापेक्षाते १६ कान्स्येनकृ

सेवैरेव समागम्य वागीशं सप्तहोत्रजा गतमैर्दण्डकारण्ये बहुभिः काम्यऋषिभिः ९ अर्हिंतास्समशे
गमभवासमलत्तयातव होमकालेन समयेपर्वकालेषु वा मनव ॥ धर्मयात्सस्वर्धर्मीरत्समाःपापिश
नाशिताः गतमेधर्षितानोवत्तापसाभ्रानपश्चिना १२ गतिमस्तगपमाणानाभवाद्यःपरमागतिः
कामेनपःप्रभावेनशक्ताहंत्वनिशाचरान १३ विनिनिवेच्छामसूतपःरविरपितेवंच बहुविघ्नतपो
विन्नेदुम्मुर्षैवराचव १४ तेनपापनमुचामेभवन्माणाश्चरावसेः तदर्थमानामतोभिर्दण्डकार
ण्यवासिभिः १५ रत्नकस्त्वसर्वभाज्ञानमायाद्विवर्षेवने मयाचैनहदवः क्रुतवाकात्स्येनपरिपा
लने १६ ऋषीणांदण्डकारण्येसङ्कृतेनवकात्मजे संक्रमचनपाद्यामिजीवमानःप्रतिश्रुव १७

तस्भतः पीडानिवर्तनेनचतुर्दशवर्षपर्यंतपिशाचव्याप्यान्मात्मागेपिश्रेयोगात्म संवेधसावश्यकत्वान्नामगणगतरत्वाणेः सेवाधिकारः किंच तत्रजा
नैरेवात्राधिकरणेनतत्राज्यपदवेस्येवेतिनात्मर्यसंस्कृतंश्रुतिज्ञातेजीवमानः जीवन्प्रतिश्रवश्रतिश्रमयाकर्तेनशत्रूणामित्यत्रहेतुः १७

श्री
वा रा
आर
२२

45 सत्यमिष्टमित्यादि १८ यस्मैकस्मैचिदपिप्रतिज्ञायतज्जःचोकिंपुनर्ब्राह्मणेभ्यइत्यर्थः १९ अनुक्तेनापिऋषिभिरितिकार्यमितिविशेषः प्रतिज्ञायकथंपु
नरकार्यमितिशेषः स्नेहः स्नेहः प्रीतिः सौहार्दं पोषभरनत्वहृदयता प्रीतोस्म्यहमपितात्पर्यात्त्वद्वचनाभावेएवमुपालम्भनार्हेनाभूत् उक्ते २० नह्यनिष्टो

मुनीनामन्यथाकर्तुंसत्यमिष्टंहिमेसदा अप्यहंजीवितंजह्यांत्वांवासीतेसलक्ष्मणां १८ नतुप्रतिज्ञांसंश्रु
त्यब्राह्मणेभ्योविशेषतः तदवश्यंमयाकार्यमृषीणांपरिपालनं १९ अनुक्तेनापिवैदेहिप्रतिज्ञायक
थंपुनः ममस्नेहाच्चसौहार्दादिदमुक्तंत्वयावचः २० परितुष्टोस्म्यहंसीतेनह्यनिष्टोनुशिष्यते सदृशं
चानुरूपंचकुलस्यतवशोभने सधर्मचारिणीमेत्वंप्राणेभ्योपिगरीयसी २१ इत्येवमुक्त्वावचनंम
हात्मासीतांप्रियांमैथिलराजपुत्रीम् रामोधनुष्मान्सहलक्ष्मणेनजगामरम्याणितपोवनानि २२
इत्यार्षेरामायणेआरण्यकाण्डेदशमःसर्गः १० अग्रतःप्रययौरामःसीतामध्येसुमध्यमा पृष्ठतस्तु
धनुष्पाणिर्लक्ष्मणोनुजगामह १ तौपश्यमानौविविधान्शैलप्रस्थान्वनानिच नदीश्चविविधार
म्याजग्मतुःसहसीतया २ ॥

नुशिष्यतेयस्मिन्नस्यप्रीतिर्नास्तिनासावनुशिष्यतेहितंन्वोपदिशतइत्यर्थः सदृशंतवस्वेद [illegible]
स्यविद्रुमववचनमितिशेषः कुलस्यानुरूपं २१ २२ इतिश्रीरामाभिरामेश्रीरामेरामायणतिलकेआरण्यकाण्डेदशमःसर्गः १० अग्रतइति १ २

२२

46 जलजाः खगा हंसादयः ३ यूथबंधान् पृषतयूथरूपेण संबंधान् पृषतामिति षष्ठी विषाणिनो महिषा नित्यनवयः ४ दिवाकरे लंबमाने सायाह्ने समर्थः यो
जनानां शतं वृत्तं दीर्घं योजनायतम् ५ पद्मपुष्करसंबाधं पद्मानि रक्तानि पुष्कराणि पुंडरीकाणि तैः संबाधः संमर्दो यस्मिन् पद्मानां पुष्करे जले संबाधे वितं
यद्यत्तमिति कतकः गजयूथैरयकृतं तीरे इति शेषः हंसा राजहंसाः कादंबाः कलहंसाः जलजातिभिः जलेजातिजैः पक्षिभिः मत्स्यादिभिः ६ गीतवादि

सारसाश्चक्रवाकाश्च नदीपुलिनचारिणः सरांसि च सपद्मानि युतानि जलजैः खगैः ३ यूथवंधाश्च पृषतो
महोत्कटान्विषाणिनः महिषाश्च वराहांश्च गजांश्च द्रुमवैरिणः ४ ते गत्वा दूरमध्वानं लंबमाने दिवाकरे
ददृशुः सहिता रम्यं तटाकं योजनायतं ५ पद्मपुष्करसंबाधं गजयूथैरलंकृतं सारसैर्हंसकादंबैः संकु
लं जलजातिभिः ६ प्रसन्नसलिले रम्ये तस्मिन् सरसि शुश्रुवे गीतवादित्रनिर्घोषो न तु कश्चन दृश्यते ७
ततः कौतूहलाद्रामो लक्ष्मणश्च महारथः मुनिं धर्मभृतं नाम प्रष्टुं समुपचक्रमे ८ इदमत्यद्भुतं श्रु
त्वा सर्वेषां नो महामुने कौतूहलं महज्जातं किमिदं साधु कथ्यतां ९ तेनैवमुक्तो धर्मात्मा राघवेण
मुनिस्तदा प्रभावं सरसः कृत्स्नमाख्यातुमुपचक्रमे १० इदं पंचाप्सरो नाम तटाकं सार्वकालिकं निर्मि
तं तपसा राम मुनिना माण्डक

निर्घोषो गीतो यतवाद्यशब्दः न तु कश्चिदेनं गीतादिकर्तेत्यर्थः धर्मभृतो नाम धर्मभृतन्नामकं धर्मभृतां
केवाशशशागतेषु अस्यासिषेकं ८ पंचाप्सरसां क्रीडासाधनत्वात् पंचाप्सरो नाम तेन नामसिद्धं सर्वकालोदकपूर्णं तटाकं सार्वकालिकं ॥ ॥

श्री
वारा
ग्राही
२४

47 अग्निपुरोगमसहिताः साग्निपुरोगमाः सर्वेश्वय्यथिताश्चभूवन्ततः सर्वेक्षुब्धास्त्रियथः १३ इतिसंविग्नमनसोः भवन्निति पाठः १४ ततः कर्तुंसर्वेदेवास्तपो
विघ्नायनियोजितानियुक्ताः विद्युद्वच्चलितवर्चसः चलितविद्युत्कान्तयः प्रधानाप्सरसः पंचमध्येनेत्रतसविवारभ्यनामसताश्चनितानाप्रागताइतिपाठः १५

सहिवैवेतपस्तीव्रंमेरुकाणिमहामुनिः दृष्टासर्वषसहस्राणिवायुभक्षोजलाशये १२ ततःक्षुब्धिताःस
र्वेदेवाःसाग्निपुरोगमाः प्रजग्मुर्वचनेसर्वेपरस्परसमागताः १३ अस्माकंकस्यविस्थानमेषप्राप्यते
मुनिः इतिसंविग्नमनसः सर्वेतत्रदिवौकसः १४ ततःकर्तुंतपोविघ्नंसर्वेदेवास्तियोजिताः प्रधा
नाप्सरसःपंचविद्युच्चलितवर्चसः १५ प्रम्लोचामिलतत्साभिमुनिर्दृष्टपरावरः तौनौमेरुत्तवपूव
देवानोकार्यमिदस्थे १६ ताश्चैवाप्सरसःपंचगुलेपत्वौचमागताः तदाकेनिमित्तेनमुनोनाश्रितेनदि
नेगृहे १७ तैश्चैवाप्सरसःपंचनिवसत्तोयथासुखं रमंयतितपोयोगान्कृतिंयौवनमास्थिते १८ त
तसोस्तकोडेसान्नूनामषवादिविविःस्वनः स्पर्शनेभ्रषणानांनिमिश्रीगीतशब्दोमनोहरः १९ प्राप्य
यमितिस्पेनहुचनेभावितात्मनः गायनःप्रतिजग्राहसहभागाममहात्मनाः २०

दृष्टपरावरः दृष्टैहिकपारलौकिकधर्मः १६ निमित्तेतेनेवस्तुनिनाश्रीतस्ययेमितिपाठः १७ तैश्चैवनिमित्तेनगृहे तपोयोगोयौवनेहेतुः १८ भूषि
णानांनिःस्वनःवलयादिभूषणाध्वनिमिश्रः १९ वचन तदर्थप्राप्ययमितिप्रतिजग्राह १९ ॥

48 एवंकथयमानः आश्चर्यमिमं वक्ष्यमाणं ब्राह्म्या लक्ष्म्या ब्रह्मविद्यासंबंधिन्या लक्ष्म्या ब्रह्मवर्चसेनेति यावत् १९ प्रविश्याश्रममंडलमिति शेषः आश्रममंडले
उवासेति शेषः २१ तदाश्रमप्रकारमाह उषित्वेति पूर्वसाश्रमे उषित्वेति शेषः पर्यायेण सर्वेषामाश्रमान् जगाम २२ किंच येषामृषीणामाश्रमे पूर्व
मुषितवान् जगाम तद्गमनं निपात्यात् सुतीक्ष्णाश्रमे पुनरागमनं एकत्रवासाभावादेवाह क्वचिदिति परिदशान् दशसंख्यापरिगतान्

एवं कथयमानः स ददर्शाश्रममंडलं कुशचीरपरिक्षिप्तं ब्राह्म्या लक्ष्म्या समावृतं १९ प्रविश्य सह वैदे-
ह्या लक्ष्मणेन च राघवः तदा तस्मिन्स काकुत्स्थः श्रीमत्याश्रममंडले २० उषित्वा स सुखं तत्र पूज्यमानो
महर्षिभिः जगाम चाश्रमांस्तेषां पर्यायेण तपस्विनां २१ येषामुषितवान्पूर्वं सकाशे स महास्त्रवित्
क्वचित्परिदशान्मासानेकं संवत्सरं क्वचित् २२ क्वचिच्च चतुरो मासान्पंच षट् चापरान्क्वचित् अपरत्रा-
धिकान्मासानध्यर्धमधिकं क्वचित् २४ त्रीन्मासानष्टमासांश्च राघवो न्यवसत्सुखं तत्र संवसतस्तस्य
मुनीनामाश्रमेषु वै २५ रमतश्चानुकूल्येन ययुः संवत्सरा दश परिसृत्य च धर्मज्ञो राघवः सह सीत-
या २६ सुतीक्ष्णस्याश्रमपदं पुनरेवाजगाम ह स तमाश्रममागम्य मुनिभिः परिपूजितः २७

दशसंख्यान् मासानित्यर्थः २३ पंच षट् चेत्यधिकान् एवमधिकानि मासानपि २४ रमतः रममाणस्य परिसृत्य सर्वमुन्याश्रमान् प्रदक्षिणीकृत्य
तिपाठांतरे शनिष्क्रम्येति पाठः यतः पुनरागतमिति प्रतिज्ञाय गतोऽतः पुनराजगामेत्यर्थः २६ २७ ॥

श्री
वा रा
आ टी
२५

49 उपासीनः समीपस्थः २९ कथाः कथयतां मत्सकाशादिति शेषः ३० मनोरथाभिनयोपदर्शनमित्यादि ३२ एतच्छब्दार्थो गम्यमित्यादि ३४ अस्मिन्नर्थे मदुपदिष्टे

तत्रापि न्यवसद्रामः कंचित्कालमरिंदमः अथाश्रमस्थो विनयात्कदाचित्तं महामुनिं २८ उपासीनः सका
कुत्स्थः सुतीक्ष्णमिदमब्रवीत् अस्मिन्नरण्ये भगवन्नगस्त्यो मुनिसत्तमः २९ वसतीति मया नित्यं कथाः
कथयतां श्रुतं न तु जानामि तं देशं वनस्यास्य महत्तया ३० कुत्राश्रमपदं पुण्यं महर्षेस्तस्य धीमतः प्रसा
दात्तत्र भगवतः सानुजः सह सीतया ३१ अगस्त्यमभिगच्छेयमभिवादयितुं मुनिं मनोरथो महानेष हृ
दि मे परिवर्तते ३२ यदहं तं मुनिवरं शुश्रूषेयमपि स्वयं इति रामस्य स मुनिः श्रुत्वा धर्मात्मनो वचः ३३
सुतीक्ष्णः प्रत्युवाचेदं प्रीतो दशरथात्मजं अहमप्येतदेव त्वां वक्तुकामः सलक्ष्मणं ३४ अगस्त्यमभि
गच्छेति सीतया सह राघव दिष्ट्या त्विदानीमर्थेस्मिन्स्वयमेव ब्रवीषि मां ३५ अहमाख्यामि ते राम
यत्रागस्त्यो महामुनिः योजनान्याश्रमात्तात याहि चत्वारि वै ततः दक्षिणेन महाञ्छ्रीमानगस्त्यभ्रातु
राश्रमः ३६ स्थलीप्राये वनोद्देशे पिप्पलीवनशोभितः बहुपुष्पफले रम्ये नानाविहगनादिते ३७ प
द्मिन्यो विविधास्तत्र प्रसन्नसलिलाशयाः

तार्थः ३५ योजनान्याश्रमात्तस्माद्यपि चत्वारि वै ततः इति कतकपाठे अस्मादाश्रमाद्योजनात्
भिन्नप्रायिकं चत्वारि योजनानीत्यर्थः दक्षिणेन मत्तश्चानीतिशेषः ततस्तत्राश्रमस्यार्थः पार्श्वे तोरणचतुर्योजनोत्तरमिति सप्तपदार्थः ३८ तदाश्रमचिह्नस्य

२५

50 तत्रागस्त्यभ्रातुराश्रमेरात्रावादेतिग्रन्थनामग्रागस्त्यः शाण्डिल्यान्वयेमेध्मवनीयस्मोदृढच्युतोजातरध्मवाहात्मनोमुनिरितिभागवतंतद्देवाश्रम
वोत्पत्तिरितिनिमायेनेत्येके ४९ दक्षिणांदिशमास्थायोजनमेतंग्रवकाशोगत्वातत्रागस्त्याश्रमंद्रक्ष्यसि ५० मनेःश्रुत्वेतिवचनमितिशेषः ५३ मार्गव

तत्रैकांरजनींमुष्यप्रभातेरामगम्यतां दक्षिणांदिशमास्थायवनखंडस्यपार्श्वतः ४९ तत्रागस्त्याश्रमे
पदंगत्वायोजनमंतरं रमणीयेवनोद्देशेबहुपादपशोभिते ५० रंस्यतेतत्रवैदेहीलक्ष्मणश्चत्वयासह
सहिरम्योवनोद्देशोबहुपादपसंयुतः ५१ यदिबुद्धिःकृताद्रष्टुमगस्त्यंतंमहामुनिं अद्यैवगमनेबुद्धिंरोच
यस्वमहामते ५२ इतिरामोमुनेःश्रुत्वासहभ्रात्राभिवाद्यच प्रतस्थेगस्त्यमुद्दिश्यसानुजःसहसीतया:
पश्यन्वनानिचित्राणिपर्वतांश्चाभ्रसन्निभान् सरांसिसरितश्चैवपथिमार्गवशानुगान् ५४ सुखे
नोपदिष्टेनगत्वातेनयथासुखं इदंपरमसंहृष्टोवाक्यंलक्ष्मणमब्रवीत ५५ एतदेवाश्रमपदंनूनं
तस्यमहात्मनः अगस्त्यस्यमुनेर्भ्रातुर्दृश्यतेपुण्यकर्मणः ५६ यथाहीमेवनस्यास्यज्ञाताःपथिसह
स्रशः संनताःफलभारेणपुष्पभारेणचद्रुमाः ५७

शानुगान्मार्गवशात्तशमान् ५४ नूनमेतदेवेमश्च्देतमाह
यथाहीतियथायदृशाचिह्नवनयावनेस्ज्ञातंतथैवास्यफलभारेणपुष्पभारेणचसन्नमताःसहस्रशोद्रुमाःज्ञाताःज्ञायमानवर्तन्ते ५७ ॥५७

श्री. वारा. माहा. २९

51 श्रामाधारणविंशतुभवनप्याहपिप्पलीनामिति पिप्पलीफलानामित्यर्थः कटुकोदयः कटुकरसं संवेष्टुदयः ४८ कुलाभ्रेनीलाभ्रशिखरं पर्वतशिखरं
होयमापस्य ५० विविक्के शुनि मंतद्यपकोतेशवस्य पमेवाजिनेः देवपूजार्थमितिशेषः ५१ मतनसंटेमशरण्यावासेयोगपालोकानां ५३ कोमोमत्स्युतस्यो

पिप्पलीनो वणिक्कानो वनाद्स्मादुपागतः । गंधोयं पवनोत्तिमं मत्स्नाकटुकोदयः ४८ नेत्रवद्रूपते से
हिमाः कोशेमवपाः लूनाश्चपरिदृश्यते दृश्यौवेकुंठवर्वसः ४९ पतञ्चवनमपश्यकुत्साभ्रशिखरोपम
णवकस्याश्रमस्यस्य धूमाग्रसंदृश्यते ५० विविक्तेषु चतीर्थेषु कृतस्नाना द्विजातयः पुण्योपहाराकु
र्वंति कुसुमैः स्वयमर्जितैः ५१ ततः स्वतीत्यवचनं पद्मासोमयमपाकृतं श्रूयतां साश्रमाभ्रातन्नवम
षभविष्यति ५२ तिमूलतत्सामस्तु लोकानां हितकाम्यया पद्मासाप्राह कृत्वेदिकश्चारण्यापुण्यक
र्मणा ५३ इदैकदा किलक्रूरो वातापिरपि वेलल्वः भ्रातरौ सहितावास्तां ब्राह्मणघ्नौ महासुरौ ५४
धारयन्ब्राह्मणं रूपमिल्वलः संस्कृतं वदन् आमंत्रयति विप्रान्स श्राद्धमुद्दिश्य निर्घृणः ५५ भ्रा
तरं संस्कृत्वा ततस्तं मेषरूपिणम् तानद्विजान्भोजयामास श्राद्धदृष्टेन कर्मणा ५६

सरोयोः गस्मेननिगृहीतो लोकरक्षणायेत्यतस्तदभ्युपिकामाह इदैकेति वेसर्थः एकदाकेस्मिंश्चित्पूर्वकाले ५४ ब्राह्मणं रूपं ब्राह्मणसदृशपवषं सं
स्कृतं वदन्ब्राह्मणवदितिशेषः पतद्भभंपेविस्यामार्थ ५५ संस्कृतं कृत्वाश्राद्धोचितपाकसंस्कारसंस्कृतं कृत्वा ५६

52 मेषवन्मदमनस्तनसंजीवनीं वैभवाइद्गातरीति शेषः विनिष्पतन् विनिर्गतवान् ग्रहभावश्राद्धैः ५८ संहत्य समेत्य प्रार्थितेन प्रार्थितास्तु रहुपसंह्रोसा

ततोभुक्तवतां तेषां विप्राणामिल्वलोब्रवीत् वातापे निष्क्रमस्वेति स्वरेण महता वदन् ५७ ततो
भ्रातुर्वचः श्रुत्वा वातापिर्मेषवन्नदन् भित्वा भित्वा शरीराणि ब्राह्मणानां विनिष्पतत् ५८ ब्राह्म
णानां सहस्राणि तैरे``कामरूपिभिः विनाशितानि संहत्य नित्यशः पिशिताशनैः ५९ अगस्त्येन त
दा देवैः प्रार्थितेन महर्षिणा अनुभूय किल श्राद्धे भक्षितः स महासुरः ६० ततः संपन्नमित्युक्त्वा द
त्वा हस्तेवने जलं भ्रातरं निष्क्रमस्वेति इल्वलः समभाषत ६१ स तदा भाषमाणं तु भ्रातरं विप्रघातिनं
अब्रवीत् प्रहसन् धीमानगस्त्यो मुनिसत्तमः ६२ कुतो निष्क्रमितुं शक्तिर्मया जीर्णस्य रक्षसः भ्रातु
स्ते मेषरूपस्य गतस्य यमसादनं ६३ अथ तस्य वचः श्रुत्वा भ्रातुर्निधनसंश्रितं प्रधर्षयितुमारेभे
मुनिं क्रोधान्निशाचरः ६४ सोभिद्रवद् द्विजेन्द्रं तं मुनिना दीप्ततेजसा चक्षुषानलकल्पेन नि
र्दग्धो निधनं गतः ६५ तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः विप्रानुकंपया येन कर्मे
दं दुष्करं कृतं ६६ ॥

मर्षिणागस्त्येनाश्राद्धे आपारमनुभूय भक्षितः सोसुरो वातापिः ६० ततः स्वं इल्वलः श्राद्धे संपन्नमि
त्युक्त्वा हस्ते जलं दत्वा भ्रातरं निष्क्रमस्वेत्यभ्यभाषत ६१ मया जीर्णस्य भक्षितस्य निशेषः ६२ प्रधर्षयितुं हिंसितुं ६४ चक्षुषा च तद्वीक्षणेनानल

८८

53 अभिवादयेत्वेतिपादेनवारत्तन्माथं १० निवाराजलकदेवाःवंजुलोःपोकः तिलशोधवःचिरबिल्वोनक्रमालः ११ यथाकृतास्तथास्निग्धपत्रा

श्री
वा रा
आली
२२

एवं कृत्वा महात्मानस्ततस्सौमित्रिणा सह रामस्यास्तंगतः सूर्यः संध्याकालोभ्यवर्तत १७ उपास्य पश्चि
मां संध्यां सह भ्रात्रा यथाविधि प्रविवेशाश्रमपदं तमृषिं चाभ्यवादयत् १८ सम्यक्प्रतिगृहीतस्तु मुनि
नातेन राघवः न्यवसत्तां निशामेकां प्राश्य मूलफलानि च १९ तस्यां रात्र्यां व्यतीतायां प्रदिते रविमंडले
भ्रातरं लक्ष्मणस्यास्य भ्रातरं च पराघवः २० अभिवादये त्वां भगवन्सुखमस्म्युषितो निशां आमंत्रये त्वां ग
च्छामि मित्रैरहं ते इहेत्यब्रवीत् २१ गम्यतामिति तेनोक्तो जगाम रघुनंदनः यथोद्दिष्टेन मार्गेण वनं तच्चावलो
कयत् २२ नीवारान्पनसान्सालान्वंजुलांस्तिलकांस्तथा चिरबिल्वान्मधूकांश्च बिल्वानथ च तिं
दुकान् २३ पुष्पितान्पुष्पिताग्राभिर्लताभिरुपशोभितान् ददर्श रामः शतशस्तत्र कांतारपादपान् २४
हस्तिहस्तैर्विमर्दितान्वानरैरुपशोभितान् मत्तैः शकुनिसंघैश्च शतशः प्रतिनादितान् २५ ततोब्रवीत्स
मीपस्थं रामो राजीवलोचनः पृष्ठतोनुगतं वीरं लक्ष्मणं लक्ष्मिवर्धनं २६ स्निग्धपत्रा यथा वृक्षा यथा ते
ताम्मृगद्विजाः आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः २७ अगस्त्यस्येति विख्यातो लोके स्वैनैव कर्मणा

वृताद्दर्पेणेरतिशोषः सुतो विकटः प्राग्रमः ११ सुगंधिर्घंसंभवंतीत्य गंगस्यः पयोदरादिः स्वेनकर्मणाविंध्यसंभवकर्मणापरिस्थांतपमायद्रेता १८

५८ श्रीरामायणे

२२

54 ध्वांतैर्भेरीभिर्धूमैः पाकयज्ञभ्रमैराकुलं वनं यस्मिन् ७९ यस्य प्रभावाद्दीप्तसैरिपमगस्त्याश्रमप्रदेशवर्तिनी दक्षिणा दिग्दृश्यते केवलं शासनं दृश्यिभी
स्यानोपभुज्यते नमस्वेदेशान्वेनो गीक्रियतः स्मर्यः ८० तिर्वैराशाणिषु वैरहिताः प्रशान्तात्मकक्रूरकर्माणः ८१ भगवतोऽस्य समहिम्ना प्रदक्षिणापतन्नमा

प्राज्यधूमाकुलवनश्चीरमालापरिष्कृतः प्रशान्तमृगयूथश्च नानानादनिनादितः ७९ निगृह्य तरसा
मृत्युं लोकानां हितकाम्यया दक्षिणा दिक्कृता येन शरण्या पुण्यकर्मणा ८० तस्येदमाश्रमपदं प्रभा
वाद्यस्य राक्षसैः दिगियं दक्षिणा त्रासाद्दृश्यते नोपभुज्यते ८१ यदाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा
तदाप्रभृति निर्वैराः प्रशान्ता रजनीचराः ८२ नाम्ना चेयं भगवतो दक्षिणा दिक्षु दक्षिणा प्रथिता त्रिषु लो
केषु दुर्धर्षा क्रूरकर्मभिः ८३ मार्गं निरोद्धुं सततं भास्करस्याचलोत्तमः संदेशं पालयंस्तस्य विन्ध्यशैलो
न वर्धते ८४ अयं दीर्घायुषस्तस्य लोके विश्रुतकर्मणः अगस्त्यस्याश्रमः श्रीमान्विनीतमृगसेवि
तः ८५

वर्जितेन निर्वैरत्वादिसंपादनसमर्थाः क्रूरकर्मभीरुताभिर्दुर्धर्षाः तेनाग्रापि संपूर्णा दिग्दक्षिणेति त्रिषु लोकेषु प्रथिता ८३ मेरुस्पर्धमायाभास्करमा
र्गं निरोद्धुं वर्धित्वका मोक्षवलोविंध्यस्तस्यागस्त्यस्य संदेशं महागमनपर्यंतं न मा वर्धस्वेत्येवमाज्ञां पालयन् न वर्धते घातिपीतिश्रेयः ८४ ८५

55

श्री
वारा
ह्मी
२८

अथ नियतात्मनस्तावद्वचसा मानसेऽश्रेयसायोजयिष्यति दिव्यशास्त्रादिदानेनेतिगूढोभिसन्धिः ८८ प्रभोश्शुश्रूषणायसमर्थोस्तस्य ८७ कश्चिन्निदशःपादोदकवि
शिषकारी नृशंसोवाचकः तथाविधःदुर्नेतासदृशः ८९ यत्रमागरुडादयःधर्मस्वर्गादिजनक ९० अत्रत्राश्रमेसिद्धानयेसतिशेषःतवैदर्थैर्दिवदे

पृथ्वीलोकाद्दिवितः साधुर्हितेनित्यंरतःसतो अस्मान्नियमतानेश्रेयसायोजयिष्यति ८८ अथायमिहाम्यन्ना
ह्मगास्तेनमहामुनि शेषंचक्रेनवासस्यतस्मो वस्माम्महे प्रभा ८७ अत्रदेवाससगन्धर्वाःसिद्धाश्चपरमर्षि
यः अगस्त्यंनियताहाराःसततंपर्युपासते ८८ नात्रजीवेन्मृषावादीक्रूरोवायदिवाशठः नृशंसःपा
पवृत्तोवाससतिरेषतथाविधः ८९ अत्रदेवाश्चयक्षाश्चनागाश्चपतगैःसह वसंतिनियताहाराधर्म
माराधयिष्णवः ९० अत्रसिद्धामहात्मानोविमानैःसूर्यसन्निभैः त्यक्त्वादेहान्नवैर्देहैःस्वर्यातापरमर्षि
यः ९१ यत्रनममरावेवराज्यानिविविधानिच अत्रदेवाःप्रयच्छंतिभूतैराराधिताःशुभैः ९२
आगताश्चाश्रमपदंसौमित्रेप्रविशाग्रतः निवेदयेहमाशाममृषयेसहसीतया ९३ इत्यार्षेश्रीरामायणेआरण्यका
ण्डेएकादशःसर्गः ॥ सप्रविश्याश्रमपदंलक्ष्मणोराघवानुजः अगस्त्यशिष्यमासाद्यवाक्यमेतदु
वाच १ ॥

हैः ९१ अत्राश्रमेभृतैःप्राणिभिःकृतैर्भिःशुभैःसकर्मभिराराधिताःदेवादयश्चाश्रममाहात्म्यादिहलोकेनैवराज्यादीनिप्रयच्छंतीत्यर्थः ९२ इति

एकादशःसर्गः ॥ ॥ ९
२८

56 रहितः शुभकरी भ्रातृकुलस्तद्दिक्षावशवर्ती पूज्यविषयानुरागो भक्तिस्तद्वान भक्तः यद्दीनिसंभावनायां बहुदिनं वनेवासादस्मच्छ्रवणं नवापि संभावितमपि
त्यर्थः ३ भगवन्तं द्रष्टुमिच्छामहे ऽन्तो दर्शनार्थमागता इति निवेदयेत्यन्वयः ४ अग्निशरणामग्निहोत्रगृहं निवेदितुं निवेदयितुं ५ श्रेजसाशीघ्रं ६ संमतइ

राजा दशरथो नाम ज्येष्ठस्तस्य सुतो बली रामः श्यामो मुनिं द्रष्टुं भार्यया सह सीतया २ लक्ष्मणो नाम तस्या
देशो नाम वरजो हितः भ्रातृकुलस्य भक्तस्य पदितश्चो भ्रमागतः ३ तेवयं वनमस्याग्रे प्रविष्टाः पितुराज्ञास
नात् द्रष्टुमिच्छामहे सर्वे भगवन्तं निवेदय ते ४ तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य तपोधनः तथेत्युक्त्वा
गुरोरग्रे प्रविवेश निवेदितुं ५ सुप्रविश्य मुनिश्रेष्ठं तपसा दुष्प्रधर्षणं कृताञ्जलिरुवाचेदं रामा
गमनमञ्जसा ६ यथोक्तं लक्ष्मणेनैव शिष्यो गस्त्यस्य संमतः श्रेष्ठो दशरथस्यैष रामो लक्ष्मणपूर्वज ७
प्रविष्टावाश्रमपदं सीतया सह भार्यया द्रष्टुं भवन्तमायातो शुश्रूषार्थमरिन्दमो ८ यच्चानन्तरं तव
माज्ञापयितुमर्हसि ततः शिष्यादुपश्रुत्य प्राप्तं राममसलक्ष्मणं ९ वैदेहीं च महाभागामिदं वचनम
ब्रवीत ॥

ष्टः ७ द्रष्टुं तदनन्तरं किंकर्तव्यमित्याह शुश्रूषार्थं सेवार्थं चागतो ८ यच्चानन्तरं तव वक्तव्यं तत् उपश्रुत्य भगवदागमनश्रवणानन्तरं मन्त्रभयेसर्वं इति नीर्थः ९ सोदृष्ट्वेम

57 यतः दिष्ट्या मम भाग्येन किं ज्ञानभीर्विनयप्रयोऽहं यः सामान्येनादर्शितं यत्तव नैव सत्यं चिरस्य चिरकालस्यागमने यागमनं तत् दिष्ट्या मद्भाग्येनोद्वेदितम्
र्थः ९ तदेवाह मनसेति यदा गमनमुद्दिश्य कांक्षितं तेनेच्छा कृता तियावत् सत्कृतः आचारोपचारैर्यथायोग्यैरित्यर्थः ॥ किमसौ न प्रवेशितः कस्मात्
नो विलंबः कृत इत्यर्थः १२ अभिवाद्यागमनं नियोगप्रयुक्तं प्रनरमिवादनेकृत्वा तथेति आनयामीत्येव १३ स्वयं प्रविशतु भगवतावगतवृत्तांत

दिष्ट्या रामश्चिरस्याद्य द्रष्टुं मां समुपागतः ९ मनसा कांक्षितं ह्यस्य मयाप्यागमनं प्रति गम्यतां सत्कृतो
रामः सभार्यः सहलक्ष्मणः ११ प्रवेश्यतां समीपं मे किमसौ न प्रवेशितः एवमुक्तस्तु मुनिना धर्म
ज्ञेन महात्मना १२ अभिवाद्याब्रवीच्छिष्यस्तथेति नियतांजलिः ततो निष्क्रम्य संभ्रांतः शिष्यो ल
क्ष्मणमब्रवीत् १३ क्वासौ रामो मुनिं द्रष्टुमेतु प्रविशतु स्वयं ततो गत्वाश्रमपदं शिष्येण सहलक्ष्मणः
१४ दर्शयामास काकुत्स्थं सीतां च जनकात्मजाम् तं शिष्यः प्रश्रितं वाक्यमगस्त्यवचनं ब्रुवन् १५

नाज्ञातस्य शिष्यस्य त्वरया प्रवेश इति भावः आश्रमपदं आश्रमप्रांतदेशं १४ लक्ष्मणः काकुत्स्थं रामं प्रदर्शयामास शिष्यमिति शेषः तं दृष्टं रामं शि
ष्यः अगस्त्यवचनं उच्यत इति वचनम् अगस्त्योक्तं वाक्यं प्रश्रितं प्रीतिप्रकं ब्रुवन् प्रावेशयदित्यन्वयः १५ ॥

58 ससत्कृते पाद्यार्घ्यादिभिरगस्त्यमार्गप्रदर्शनेनच सत्कृते १६ अगस्त्याश्रमस्य देवतास्थानदर्शनमाह सत्वेति तत्राश्रमे सरामः ब्रह्मणो हिरण्यगर्भस्य
कल्पितस्थाने अग्निरग्निरुद्रः भगः स्थूलमेरुलाभिमानी १७ धाता कार्यप्रजापतिः विधाता विश्वकर्मेति कतकः १९ गायत्री सरस्वती सावित्र्योरप्युपल

प्रवेशयच्चाश्रमपैसत्कारार्हैस्तसत्कृते प्रविवेश ततो रामः सीतया सहलक्ष्मणः १६ प्रविश्य तद्दीप्ता
कारणमाश्रमं ह्यवलोकयन्‌ स च ब्रह्मणः स्थानमग्नेः स्थानं तथैव च १७ विष्णोः स्थानं महेन्द्रस्य स्थानं च
व विवस्वतः सोमस्थानं भगस्थानं कौबेरमेव च १८ धातृविधातृस्थाने च वायोः स्थानं तथैव च स्था
नं च पाशहस्तस्य वरुणस्य महात्मनः १९ स्थानं तथैव गायत्र्या वसूनां स्थानमेव च स्थानं च नागरा
जस्य गरुडस्थानमेव च २० कार्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति ततः शिष्यैः परिवृतो मुनिर
प्यभिनिष्पतत्‌ २१ तं ददर्शाग्रतो रामो मुनीनां दीप्ततेजसम्‌ अब्रवीद्वचनं वीरो लक्ष्मणं लक्ष्मिवर्धनं
२२ बहिर्लक्ष्मण निष्क्रामत्यगस्त्यो भगवानृषिः औदार्येणावगच्छामि निधानं तपसामिदम्‌ २३

तेषां २० पश्यतीस्थानानि पश्यतीति न्वयः एतेन पूजास्थानपतावतो देवानां पूजावश्यकीर्तिसूचिते अभिनिष्पतन्‌ अटभावआर्षः अभ्युत्थानं कृत
वानित्यर्थः २१ मुनीनामग्रतः स्थितमिति शेषः ईदृशो नमगस्त्यं ददर्शेत्यन्वयः २२ औदार्येण तेजोतिशायजनितोत्रमजेन्न २३ ॥

श्री
वा॰ रा॰
आ॰ टी॰
३

एवमगस्त्य उक्त्वा लक्ष्मणं प्रविवेश पवित्राश्रमपततः आश्रमादागच्छतः न समुत्थितः पादौ जग्राह दक्षिणाभ्यां सव्यं चापादौ सव्येन सव्यमस्पृशत्कारेण स्पृष्टः २४ योगवृद्धि-
भ्यां रामसदृहृद्याधीनः तस्मै २५ प्रतिगृह्य स्वाश्रमं प्रवेश्य आलिङ्ग्य सर्वैः २६ अग्निं हुत्वा स्वविस्तारेण पदेशाग्निमिति वैश्वदेवहोमे कृते वै मार्घ्यः अतिथीन् रामादीन् २-
आसीनं प्राञ्जलिमित्यर्थः इति शोकः ममतवमतिश्च प्रथममिति मोजनेदत्तविमेनेन नान्वेति प्रथमोपविश्य प्रतिथिपूजाव्यथन मानावमर्षेन मन्त्रपवेश

एवमुक्त्वा महाबाहुरगस्त्यं सर्वधर्मवित् जग्राहापततस्तस्य पादौ च रघुनन्दनः २४ अभिवाद्य तु धर्मा-
त्मा तस्थौ रामः कृताञ्जलिः सीतया सह वैदेह्या तदा रामः सलक्ष्मणः २५ प्रतिगृह्य च काकुत्स्थमर्च-
यित्वासनोदकैः कुशलप्रश्नमुक्त्वा च आस्यतामिति सोऽब्रवीत् २६ अग्निं हुत्वा प्रदायार्घ्यमतिथीन्प्रतिपू-
ज्य च वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ २७ प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुङ्गवः उवाच राम-
मासीनं प्राञ्जलिं धर्मकोविदं २८ अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन् दुःसाक्षीव परे लोके
स्वानि मांसानि भक्षयेत् २९ राजा सर्वस्य लोकस्य धर्मचारी महारथः पूजनीयश्च मान्यश्च भवान्प्राप्तः प्रि-

नमिति २८ एवं तत्त्रिविधपूजाविनेमार्थं कोऽसमाचितः अकृते मप्रत्यवायमाह अन्यथेति अन्यथा समुदाचरन् एवमतिथिपूजनमकुर्वन्नित्यर्थः दुः-
साक्षी कूटसाक्षी एवं वचनस्य वाच्यपरिहारो यद्वमतिथिपूजावश्यकीयताया तदधिकोऽतिथिश्चेनान्यथाह राजेति सर्वलोकराजा सर्वलोक-
नियन्ता ते न च रक्षणीयो धर्मचारिणा ननतत्वं वनके दशास्त्वं प्रियातिथिः सन प्राप्तोऽतः पूजनीयो मानयश्च मान्यैश्चैनैनः पांनमेवास्माकमाराधनी-

60 देश्याद्वज्रेणाव भूषितं वैष्णवमिति पर पुरामनरहीनावहारणाद्धस्तेदनं यद्यमेणादेववस्मादद्दायमहेन्द्रेणास्मैनिहितमित्येति तिकल्कः योगेवमहेन्द्रेणदेनाद्वव
हरणपर्वस्यते ३२ बाणमाणस्तोत्रमदत्तमस्तदाय्यमतूणीचेति वनपञ्चः पारपारुभयोरिद्दत्तमप्यते ३३ महारजतस्तवर्णाहिमविभूषितामसिरिदेशा ३४

एवमुक्त्वा फलैर्मूलैः पुष्पैश्चान्यैश्च राघवं पूजयित्वा यथाकामं ततोऽगस्त्यस्तमब्रवीत् ३१ इदं दिव्यं म
हच्चापं हेमवज्रविभूषितं वैष्णवं पुरुषव्याघ्रनिर्मितं विश्वकर्मणा ३२ अमोघः सूर्यसंकाशो ब्रह्म
दत्तः शरोत्तमः दत्तो मम महेन्द्रेण तूणी चाक्षयसायकौ ३३ संपूर्णौ निशितैर्बाणैर्ज्वलद्भिरिव पावकैः
महारजतकोशोऽयमसिर्हेमविभूषितः ३४ अनेन धनुषा रामहत्वा संख्ये महासुरान् आजहार
श्रियं दीप्तां पुरा विष्णुर्दिवौकसां ३५ तद्धनुस्तौ च तूणी च शरं खड्गं च मानद जयाय प्रतिगृह्णीष्व
वज्रं वज्रधरो यथा ३६ एवमुक्त्वा महातेजाः समस्तं तद्वरायुधं दत्त्वा रामाय भगवानगस्त्यः पुनरब्रवी
त् ३७ इत्यार्षे रामायणे आरण्यकांडे द्वादशः सर्गः १२

वज्रं वज्रधरो यथेत्यनेन नवदीयमेव वस्तु यथा स्वीक्रियते तथेति धनिवारणपुर्वरस्य विलोपणपुर्वक्रमास्त्वं च ३७ इति श्री रामायणे आरण्यकांडे द्वादशः सर्गः १२

श्री
वा रा
म्राटी
३१

61 रामश्रीतोऽस्मि लक्ष्मण परित्यक्तोऽस्मि रामसीतानमरवेन परित्तोषः भगवद्विषयप्रीते रेवभक्तिवेनतदृक्तोऽहमिति धनितं स्यं इति श्रस्ते लोदिम धमशुद्धपविव
वने १ अश्वश्रमेणा श्रधगमनादिश्रु रुक्ष स्वदादिकार्यकारीश्रमः श्वेदोदुःखश्रुदश्रमस्तत्त्वेद्रः स्ववाधज्ञेमैथिली मिति शेषः अनपवेयपत्रकसुकं देतक चिद्विश्रा
तयेशनि शेषः २ नवमानितारतः शाक करापिपारिताखेदजनके दुर्वनिरिति पतातरं शान्यदो वश भूतदोषं ३ इक्ष्वाकुरामा प्रति पादन पोषन पालोक

रामश्रीतोऽस्मि भद्रं ते परित्यक्तोऽस्मि लक्ष्मण अभिवादय पितृन्सर्वान्यामो यस्य सह सीतया १ अश्रमेणा वो विदेवा
धनेश्वरश्रमः यक्ष सकं दते वापि मैथिली जनकात्मजा २ पथा वसु कुमारी च दुःखैः स्वजनविमानिता
श्रान्य दोषं वने शामाभन्ने स्ते रहश्च चोदिता ३ पथैषा रामने राम राह सीता तथा कृत इक्ष्वाकुनंदने मेषा वने
त्वामभिगच्छती ४ यथा दृश्य कृतिः स्त्रीणा मारदे रक्षणं ते दन समस्य मत्र राज्यं ते विषमस्थान जंनिच ५
एतदहतालोलं वंश स्त्राणां नीतानां तत्था गत दत्तितयोः सौत्मन दुग्गछति योषितः ६ इवं त्वभव
तो भार्या दोषैरेतैर्विवर्जिता श्लाघ्या च व्यपदेशा च यथा दैवश्च हं पती ७ ॥

व्यवहारमाह एवेति अस्तस्ये: स्त्रिमारभ्य समस्थं धनुधामादिश्रुकृत यास्य गवस्थितं विषमस्थं शरीरारोमादिग्रस्ते ५ एकस्थानवस्थानादियुतां
स्वावत्समतुगच्छति वहुकालागतस्वेद वधश्चेदेनपास्वेतेसाएणानुगमः नियकार्यकरणे वाधादिपो व्यानुगमः ६ श्लाघ्या दोषराहित्य पूर्वक गुणा
सपदासद्भिः प्रशसमीयाव्यपदेश पापति व्रता स्वगणा ७

३१

62 अयं देशो महाश्चर्य उपशमनमात्रेणालंकृतः देवतामयत्र देशे इतः परं वत्स्यसि सोऽलंकृतो भविष्यतीति किं वक्तव्यमित्यर्थः ८ किंतु किंचिद्दक्षिणमस्तीत्यर्थे
व्याहरिणोत्यय आश्रमपदं वासस्थानं निरतः प्रीतः ११ ध्यात्वा वासोचितं देशमिति शेषः ततः उवाच मर्यादांपि राघवः तत्र पंचवटस्य समूहसत्वात् पंचवटीति ता
भिर्विश्रुतः प्रसिद्धः १३ एवं वसतोऽनः पितृवचनपरिपालनाय वनवासरूपः तपः स्नेहात् तपसः प्रभावेन विदितः हृदिस्थितः अपहृतीतेन तपसा ज्ञातः

अलंकृतोऽयं देशश्च यत्र सौमित्रिणा सह वैदेह्या चानया राम वत्स्यसि त्वमरिंदम ८ एवमुक्तस्तु मुनिना
राघवः संयताञ्जलिः उवाच प्रश्रितं वाक्यमृषिं दीप्तमिवानलं ९ धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनि
पुंगवः गुणैः सभ्रातृभार्यस्य गुरुर्नः परितुष्यति १० किंतु व्यादिश मे देशं सोदकं बहुकाननं यत्राश्र
मपदं कृत्वा वसेयं निरतः सुखं ११ ततोऽब्रवीन्मुनिश्रेष्ठः श्रुत्वा रामस्य भाषितं ध्यात्वा मुहूर्तं धर्मा
त्मा ततो वाच वचः शुभं १२ इतो द्वियोजने तात बहुमूलफलोदकः देशो बहुमृगः श्रीमान् पंचवट्य
भिविश्रुतः १३ तत्र गत्वाश्रमपदं कृत्वा सौमित्रिणा सह रमस्व त्वं पितुर्वाक्यं यथोक्तमनुपालयन् १४
विदितो ह्येष वृत्तांतो मम सर्वस्तवानघ तपसश्च प्रभावेन स्नेहाद्दशरथस्य च १५ हृदयस्थश्च ते छं
दो विज्ञातस्तपसा मया इह वासं प्रतिज्ञाय मया सह तपोवने १६

यत्ते कश्चित् दशरथस्य वृत्तांतः कैकेयीवरादयः प्राणत्यागादिरूपः स तपःप्रभावेण एव मे विदितः १५ यदिह वासं प्रतिज्ञाय आगाः अयोध्याया भ्रातृभार्यासहितः आगतः तत् महामुनि
तपोवने वनवासस्य सौम्य वत्स्यामि इत्यनेन मम समीपे इह मदाश्रमे वासं प्रतिज्ञाय पुनर्मोऽप्रति व्यादिश मे वासमित्येतद्दर्शितं ॥ ॥ ॥

श्री
वा रा
अर टी
३२

63 म्यं ते तनेत्यत्र स्पष्टे छंदश्च अभिप्रायो मया ज्ञातं अत्रावस्थाने शक्तिर्ज्ञाता एतत्सर्वं धनिर्वाहेन भवति अत्र एतस्यागमनाभावादिरूपे वेद्रूपमिति भावः १६ अतस्त्वद
भिप्रायज्ञानात् पंचवटीं गच्छेति बुद्धिमिव ब्रवीमि ततराघवस्य बहुशो चितमपीदृ तिष्ठेति ब्रवीमीत्यर्थः तदत्तार्थवादमाह सहीति १७ विविक्तः एकांतः पु
ण्यः पुण्यजनको रम्यो हृष्टिमनस्कः १९ परिरक्षणे शक्तस्तापसानामिति शेषः भवानपीत्यनेन स्वस्यापि तापसरक्षणसामर्थ्यबोधनेन स्वाश्रमे राक्षसापी

अन्यत्र त्वामहं भूमिं गच्छ पंचवटीमिति स हि रम्यो वनोद्देशो मैथिली तत्र रंस्यते १७ स देशः श्लाघनीयश्च
नातिदूरे च वा ततः गोदावर्याः समीपं च मैथिली तत्र रंस्यते १८ प्राज्यमूलफलश्चैव नानाद्विजगणैर्युतः
विविक्तश्च महाबाहो पुण्यो रम्यस्तथैव च १९ भवानपि सदाचारः शक्तश्च परिरक्षणे अपि चात्र वसन् राम
तापसान् पालयिष्यसि २० एतदालक्ष्यते वीर मधूकानां महावनं उत्तरेणास्य गंतव्यं न्यग्रोधमपि गच्छता
ततः स्थलमुपारुह्य पर्वतस्याविदूरतः ख्यातः पंचवटीत्येव नित्यपुष्पितकाननः २२ अगस्त्येनैवमु
क्तस्तु रामः सौमित्रिणा सह सत्कृत्यामंत्रयामास तमृषिं सत्यवादिनं २३

डास्तु विना अत्र पंचवट्याश्रमे पालयिष्यसि प्रतिज्ञातपालननिर्वाहं करिष्यसि २० अस्य मधूकवनस्योत्तरेणेत्यर्थः न्यग्रोधं वटपलाशितमाश्रमं गच्छता २१
स्थलं निर्जनं दर्शे उपारुह्य प्राप्य कस्यचित् पर्वतस्याविदूरतः समीपतः पंचवटीत्येव ख्यातो देशः २२ सत्कृत्य प्रदक्षिणनमस्कारादिभिः २३

३१

64 विषक्ततूणी पृष्ठयोर्लग्नपृष्ठप्रदेशं तूणीरवन्तौ २५ इत्यार्षे रामायणे आरण्यकाण्डे त्रयोदशः सर्गः १३ अंतरा मध्ये १ तं पक्षिणं दृष्ट्वा मेनाते विज्ञातवंतौ मेनाते राक्षसं ब्रुवाणौ परस्परं कथयंतौ को भवानिति पप्रच्छतुरिति शेषः २ आत्मनः पितुः श्रीमद्दशरथस्य पितुरित्यर्थः ३ वचनं वंशनामप्रश्नविषयकं वचनमित्यर्थः श्रुत्वा तिक

तौ तदेनाभ्यनुज्ञातौ कृतपादाभिवंदनौ तमाश्रमं पंचवटीं जग्मतुः सह सीतया २४ गृहीतचापौ तु नरा
धिपात्मजौ विषक्ततूणी समरेष्वकातरौ यथोपदिष्टेन पथा महर्षिणा प्रजग्मतुः पंचवटीं समाहितौ २५
इत्यार्षे रामायणे आरण्यकाण्डे त्रयोदशः सर्गः १३ अथ पंचवटीं गच्छन्नंतरा रघुनंदनः आससाद महाका
यं गृध्रं भीमपराक्रमं १ तं दृष्ट्वा तौ महाभागौ वनस्थौ रामलक्ष्मणौ मेनाते राक्षसं पक्षिं ब्रुवाणौ को
भवानिति २ ततो मधुरया वाचा सौम्यया प्रीणयन्निव उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः ३
स तं पितृसखं बुद्ध्वा पूजयामास राघवः स तस्य कुलमव्यग्रमथ पप्रच्छ नाम च ४ रामस्य वचनं
श्रुत्वा कुलमात्मानमेव च आचचक्षे द्विजस्तस्मै सर्वभूतसमुद्भवं ५ पूर्वकाले महाबाहो ये प्र
जापतयोऽभवन् तान्मे निगदतः सर्वानादितः शृणु राघव ६ ॥

थ तं संगात्सर्वभूतसमुद्भवमाचचक्षे इत्यर्थः आत्मानमात्मीयं चेत्यर्थः ५ पूर्वकाले ब्रह्मणो सृष्ट्यादिकाले तान् प्रजापतीन् ६ ॥ ६ ॥

श्री
वा॰ रा॰
आ॰
११

65 कर्दमाद्याः सप्त प्रजापतयो बभूवुः ७ दक्षस्य षष्टिर्दुहितरो बभूवुरित्यन्वयः महायशा इति रामसंबुद्धिः १० दक्षकन्यानां कश्यपपत्नीनां नामान्याह अदिति
मित्यादि अष्टाविंशपलहीणा कश्यपाय त्रयोदश सोमाय त्रोकेः बत्समाणमासनानापपेगिम्पोष्टविनिवा ॥ तन्मनास्तत्सदृशपुत्राभिलाषवती दैदि

कर्दमः प्रथमस्तेषां विकृतस्तदनन्तरः शेषश्च संश्रयश्चैव बहुपुत्रश्च वीर्यवान् ७ स्थाणुर्मरीचिरत्रिश्च क्रतु
श्चैव महाबलः पुलस्त्यश्चाङ्गिराश्चैव प्रचेताः पुलहस्तथा ८ दक्षो विवस्वानपरोऽरिष्टनेमिश्च राघव कश्य
पश्च महातेजास्तेषामासीच्च पश्चिमः ९ प्रजापतेस्तु दक्षस्य बभूवुरिति विश्रुताः षष्टिर्दुहितरो राम यश
स्विन्यो महायशाः १० कश्यपः प्रतिजग्राह तासामष्टौ सुमध्यमाः अदितिं च दितिं चैव दनुमपि च काल
कां ११ ताम्रां क्रोधवशां चैव मनुं चाप्यनलामपि तास्तु कन्यास्ततः प्रीतः कश्यपः पुनरब्रवीत् १२ पुत्रांस्त्रै
लोक्यभर्तॄन्वै जनयिष्यथ मत्समान् तास्तु कन्यास्ततः प्रीतः कश्यपः पुनरब्रवीत् अदितिस्तन्मना राम दि
तिश्च दनुरेव च १३ कालका च महाबाहो शेषास्त्वमनसोऽभवन् अदित्यां जज्ञिरे देवास्त्रयस्त्रिंशदरिन्दम
१४ आदित्या वसवो रुद्रा अश्विनौ च परंतप दितिस्त्वजनयत्पुत्रान्दैत्यांस्तात यशस्विनः १५ ॥

तिदनुकालकानां विशेषणम् अमनसस्तथा मनोरथहीनाः तत्काले तासां कन्या संतानं वत्स्यति १४ अश्विनौ चेत्यतास्त्रयस्त्रिंशात् १५ ॥

११

66 तेषां हि निपुत्राणां वनेचराणां वस्त्रसदृशत्वसवनार्णवा १९ क्रौंच्यादिसंतानमाह उलूकानिति १८ संबोधननाम मध्ये भद्रे तेषु तिर्यग्योगः इति मनेभद्रम्

तेषामियं वसुमती पुरासीत्सवनार्णवा इमुत्सृजन यस्त्वमस्य ग्रीवमरिंदम १६ ताम्रं कालकं चैव।
कालिकापि व्यजानत क्रौंचीं भासीं तथा श्येनीं धृतराष्ट्रीं तथा शुकीं १७ ताम्रा तु सुषुवे कन्याः पंचैता
लोकविश्रुताः उलूकान् जनयत्क्रौंची भासी भासान्व्यजायत १८ श्येनी श्येनांश्च गृध्रांश्च व्यजायत
सुतेजसः धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः १९ चक्रवाकांश्च भद्रं ते विजज्ञे सापि भामिनी
शुकी नतां विजज्ञे तु नतायां विनता सुता २० दश क्रोधवशा राम विजज्ञे प्यात्मसंभवाः मृगीं च मृ-
गमंदां च हरिं भद्रमदामपि २१ मातंगीमथ शार्दूलीं श्वेतां च सुरभिं तथा सर्वलक्षणसंपन्नां सुर-
सां कद्रुकामपि २२ अपत्यं तु मृगाः सर्वे मृग्या नरवरोत्तम ऋक्षाश्च सृमराश्चमरा-
स्तथा २३ ततस्त्विरावती नाम जज्ञे भद्रमदा सुता तस्यास्त्वैरावतः पुत्रो लोकनाथो महागजः २४

तिर्यग्विशेषः २० क्रोधवशा कश्यपपत्नी तस्या दशापत्यान्याह मृगीं चेति २१ सृमराः श्यामकेशपुच्छाः चमराः श्वेतकेशपुच्छा इति भेदः २३ २४

श्री॰
वा रा
आ टी
२४

67 ह्रयः सिंहा गोलांगूलाश्च इति पूर्वेणान्वयि १७ गोवा गाः इत्यर्थः नागा बहुफलाः सर्पाः तेभ्यः पन्नगा इति तीर्थः निर्विषा नागास्तु दृमे पन्नगा इति कतकः २८ जन
यत जनयदित्यर्थः १९ उरसः बाहुमध्यात् क्वचित् बाहुभ्यामिति पाठः २० अनलापि च जायते स्म नेन कश्यपस्याशना मपि पत्नी नो से तानाशुकास्व

हरींश्च हरयोऽपत्यं वानरांश्च तपःस्विनः गोलांगूलांश्च शार्दूली व्याघ्रांश्चाजनयत्सुतान् २५ मातंगास्त्व
थ मातंग्या अपत्यं मनुजर्षभ दिशागजं तु काकुत्स्थ श्वेताप्यजनयत्सुतं २६ ततो दुहितरौ राम सुरभिर्देव्य
जायत रोहिणीं नाम भद्रं ते गंधर्वीं च यशस्विनीं २७ रोहिण्यजनयद्गा वै गंधर्वी वाजिनः सुतान् सु
रसाजनयन्नागान् रामकद्रूश्च पन्नगान् २८ मनुर्मनुष्यान्जनयत्कश्यपस्य महात्मनः ब्राह्मणान्क्षत्रि
यान्वैश्यान्शूद्रांश्च मनुजर्षभ २९ मुखतो ब्राह्मणा जाता उरसः क्षत्रियास्तथा ऊरुभ्यां जज्ञिरे वैश्याः प
द्भ्यां शूद्रा इति श्रुतिः ३० सर्वान्पुण्यफलान्वृक्षाननलापि व्यजायत विनता च शुकीपौत्री कद्रूश्च सुरसा
स्वसा ३१ कद्रूर्नागसहस्रं तु विजज्ञे धरणीधरान् द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च ३२

वंशप्रदर्शनायाह विनता चेत्यादि शुकीपौत्री शुकीपुत्रीनतानस्या विनतापुत्रीत्यर्थः सुरसा कद्रूश्च नामा स्वसेते ३१ नागसहस्रं पन्नगसहस्रमित्यर्थः ३२

[illegible]

68 श्येनीपुत्रमिति तत्रताम्राया गृध्रोलूकी श्येनी सा श्येनी सुकी पौत्री पुत्रस्याः पुरुषस्य कश्यपभार्येति वेनतत्त्वेनानपराणवतितानाग्रजोसंपातिश्येनीस्वदेषः विधिनिषेधयो में
न्यथाधिकारेनाहं वासस हायः वा समहायः वा स्यां तेसीतां रक्षणसहायभूतः यदीच्छसि उक्तार्थमिति शेषः नदेवाह सीतामिति त्वयि याते सगणयाचार्य ११

तस्माज्जातोहमरुणात्तस्यापत्यं सम्पातिर्मम अग्रजः जटायुरिति मां विद्धि श्येनीपुत्रमरिंदम ३३ सोहं वासस
हायस्ते भविष्यामि यदीच्छसि सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे ३४ जटायुषं तु प्रतिपूज्य रा
घवो मुदा परिष्वज्य च सन्नतोभवत् पितुर्हि शुश्राव सखित्वमात्मवान् जटायुषं संकथितं पुनःपुनः
३५ स तत्र सीतां परिदाय मैथिलीं सहैव तेनातिबलेन पक्षिणा जगाम तां पंचवटीं सलक्ष्मणो
रिरंसिषन्स वनानि पालयन् ३६ इत्यार्षे रामायणे आरण्यकाण्डे चतुर्दशः सर्गः १४ ततः पंच
वटीं गत्वा नानाव्यालमृगायुताम् अयं पंचवटीदेशः सौमित्रे पुष्पितकाननः १ ॥

परिवाप रक्षणार्थं जटायुषेतिशेषः परिदायेति पाठे परिवार्येत्यर्थः ३६ इति श्रीरामायणे आरण्यकाण्डे चतुर्दशः सर्गः १४ व्यालः श्वापदसर्पयो
रिति कोशः मृगा हरिणादयः १ यं देशं मुनिरब्रवीत् यथोहिष्टं तं देशमागताः स्मेत्यन्वयः २ ॥

श्री
वा रा
आ टी
३५

69 दृष्टिश्चार्यतां प्रेर्यतामित्यर्थः निपुणः आश्रमो विहितदेशज्ञान इति शेषः संमतः सीताया इति शेषः ३ तदेवाह रमत इति वैदेहीत्यर्थः ४ वनरामण्यकं मनसो रा
मणीयत्वं ५ संयताञ्जलिः बद्धाञ्जलिः हे काकुत्स्थ त्वयि स्थिते विद्यमाने वर्षशतमप्यहं परवानेव त्वदधीन एव न कदाचिदपि मे स्वातन्त्र्यमित्यर्थः स्वयं तु त्वं श्रये

सर्वतश्चार्यतां दृष्टिः कानने निपुणो ह्यसि आश्रमः कतरस्मिन्नो देशे भवति संमतः ३ रमते यत्र वैदेही त्वम
हं चैव लक्ष्मण तादृशो दृश्यतां देशः संनिकृष्टजलाशयः ४ वनरामण्यकं यत्र जलरामण्यकं तथा
संनिकृष्टं च यस्मिंस्तु समित्पुष्पकुशोदकम् ५ एवमुक्तस्तु रामेण लक्ष्मणः संयताञ्जलिः सीतासमक्षं
काकुत्स्थमिदं वचनमब्रवीत् ६ परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते स्वयं तु रुचिरे देशे क्रियता
मिति मां वद ७ सुप्रीतस्तेन वाक्येन लक्ष्मणस्य महाद्युतिः विमृशन् रोचयामास देशं सर्वगुणान्वितं ८
स तं रुचिरमाक्रम्य देशमाश्रमकर्मणि हस्ते गृहीत्वा हस्तेन रामः सौमित्रिमब्रवीत् ९ अयं देशः समः
श्रीमान् पुष्पितैस्तरुभिर्वृतः इहाश्रमपदं रम्यं यथावत्कर्तुमर्हसि १० इयमादित्यसंकाशैः पद्मैः सु
रभिगन्धिभिः अदूरे दृश्यते रम्या पद्मिनी पद्मशोभिता ॥

रुचिरो देश इति विचार्य त्वं रुचिरे देशे क्रियतामिति वद ७ विमृशन् पर्यालोचयन् ८ हस्तेन स्वहस्तेन हस्ते लक्ष्मणस्य हस्ते लक्ष्मणं गृहीत्वेत्यर्थः अनेन
स्नेहातिशयः कामेन तं गतं स्वामित्वं च दर्शितं ९ आदित्यसंकाशैस्तद्वज्ज्वलद्भिः रक्तैरिति शेषः पद्मशोभिता पद्मश्रिया शोभायुक्ता ॥ ३५

70 यथाख्यातंनवैयंगोदावरीहंसपतत्रार्थः १२ मृगयूथैःपानार्थमागतैर्निपीडितानिविडेतियावत् १३ प्रांशवउन्नताः फलैःविकसितश्च

यथाख्यातमगस्त्येनमुनिनाभावितात्मना इयंगोदावरीरम्यापुष्पितैस्तरुभिर्वृता १२ हंसकारंड-
वाकीर्णचक्रवाकोपशोभिता नातिदूरेनचासन्नेमृगयूथनिपीडिता १३ मयूरनादितारम्याःप्रा-
ंशवोबहुकंदराः दृश्यंतेगिरयःसौम्याःफलैस्तरुभिरावृताः १४ सौवर्णैराजतैस्ताम्रैर्देशेदेशेच
धातुभिः गवाक्षिताइवाभांतिगजाःपरमभक्तिभिः १५ सालैस्तालैस्तमालैश्चखर्जूरैःपनसैर्द्रुमैः
नीवारैस्तिनिशैश्चैवपुन्नागैश्चोपशोभिताः १६ चूतैरशोकैस्तिलकैःकेतकैरपिचंपकैः पुष्प-
गुल्मलतोपेतैस्तैस्तैस्तरुभिरावृताः १७ स्यंदनैश्चंदनैर्नीपैःपनसैर्लकुचैरपि धवाश्वकर्णखदिरैः
शमीकिंशुकपाटलै १८ इदंपुण्यमिदंरम्यमिदंबहुमृगद्विजं इहवत्स्यामिसौमित्रेसार्धमेतेनप-
क्षिणा १९ ॥

धवद्भिः १४ सौवर्णैःस्वर्णैर्भैः परमभक्तिभिर्गवाक्षितागताश्च भक्तिभिर्गवाक्षाकारनीलपीतादिवर्णरचनारूपालंकारैः रंजिताः
१५ सालाद्यावृक्षविशेषाः १६ १७ १८ इदंस्थलंपक्षिणाजटायुना १९ ॥

श्री
वा॰ रा॰
आ॰ टी॰
२९

71 संघातमृत्तिकां भित्तिरूपेण संयुतां प्राप्तामृत्तिकां यस्यां सा दीर्घैर्मस्करैर्वेणुभिः कृतवंशां कृतवंशाकार्यां २१ आस्तीर्येति तिर्यग्वंशोपरि न्यस्योपरितिशेषः दृढ
पाशावपाशितां दृढबन्धनबद्धां २२ तं लक्ष्मणं तं राघवस्यार्थे निवासं पर्णशालां अकरोदिति शेषः २३ स गत्वेति पद्मानि स्नात्वा नेतुमिति शेषः सफलः

एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा प्रविश्याश्रमं भ्रात्रा चकार सुमहाबलः २० पर्णशालां सुविपु
लां तत्र संघातमृत्तिकां सुस्तम्भां मस्करैर्दीर्घैः कृतवंशां सुशोभनां २१ शमीशाखाभिरास्तीर्य दृढपाशा
वपाशितां कुशकाशशरैः पर्णैः सुपरिच्छादितां तथा २२ समीकृततलां रम्यां चकार सुमहाबलः
निवासं राघवस्यार्थे प्रेक्षणीयमनुत्तमं २३ स गत्वा लक्ष्मणः श्रीमान्नदीं गोदावरीं तदा स्नात्वा पद्मानि
चादाय सफलः पुनरागतः २४ ततः पुष्पबलिं कृत्वा शान्तिं च स यथाविधि दर्शयामास रामाय तद
दाश्रमपदं कृतं २५ स तं दृष्ट्वा कृतं सौम्यमाश्रमं सह सीतया राघवः पर्णशालायां हर्षमाहारयत्परं
सुसंहृष्टः परिष्वज्य बाहुभ्यां लक्ष्मणं तदा अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् २६ प्रीतोऽस्मि ते महत्
कर्म त्वया कृतमिदं प्र॰॰॰ देयो निमित्तं ते परिष्वङ्गो महा

टि
टि

मार्गस्थवृक्षेभ्यो गृहीतफलः २४ कृत्वा स्वयमेवेति शेषः शान्तिं वा
स्तुशान्तिं २५ आहारयत् प्राप्तवान् २६ ईदृशमहतिकर्मणि हृष्टान्तं प्रदेयोऽर्थो भवितः यन्निमित्तं यच्छदेयं तन्निमित्तमेव मया परिष्वङ्गः कृतो मया देयः सदेय

रामायण २८
२९

72 भावोभिप्रायः कृतउपकारः नसंवृत्तः नमृतः किंतुजीवन्नेवपितेदेवत्वयापरिपालनादितिभावः २९ इतिश्रीरामायणेआरण्यकांडेपंचदशःसर्गः १५ अ
यकविः सूर्यनावारंगान्नेवकः कामोहीपंकेहेमंतंवर्णयति लक्ष्मणस्रावेनवसनइतिपंचक्वचामिति शेषः इष्टोरामस्येतिशेषः कामिन्याचयाराघापा

भावज्ञेनकृतज्ञेनधर्मज्ञेनचलक्ष्मणः त्वयापुत्रेणधर्मात्मानसंवृत्तःपितामम २९ एवंलक्ष्मण
मुक्त्वातुराघवोलक्ष्मिवर्धनः तस्मिन्देशेबहुफलेन्यवसत्ससुखंवशी ३० कंचित्कालंसधर्मा
त्मासीतयालक्ष्मणेनच अन्वास्यमानोन्यवसत्स्वर्गलोकेयथामरः ३१ इत्यार्षेरामायणेआरण्य
कांडेपंचदशःसर्गः १५ वसतस्तस्यतुसुखंराघवस्यमहात्मनः शरद्व्यपायेहेमंतऋतुरिष्टः
प्रवर्तत १ सकदाचित्प्रभातायांशर्वर्यांरघुनंदनः प्रययावभिषेकार्थंरम्यांगोदावरींनदीं २
प्रह्वः कलशहस्तस्तंसीतयासहवीर्यवान् पृष्ठतोनुव्रजन्भ्रातासौमित्रिरिदमब्रवीत् ३ अयं
सकालःसंप्राप्तःप्रियोयस्तेप्रियंवद अलंकृतइवाभातियेनसंवत्सरःशुभः ४

येनाहमागमनेनेमंतस्मृतिरितिअत्राकइतिसंध्याभावः मित्रपदेत्वत्वा १ पृष्ठतःरामस्येतिशेषः ३ येनेहेमंतेनशुभोपिसंवत्सरःसपक्ष्मस्यादिसंयम्याअलं

श्री का॰ प्रा॰ १०

73 हेमंतधर्मानाह नीहारेणपरुषः कठिनस्पर्शः वस्त्रादिस्पर्शसहशीतः इति कश्चित् जलान्यनुपभोग्यानि ... सुभगः इष्टः ५ कालेआग्रयणानुष्ठानका
ले नवाग्रयणपूजाभिः नवान्नशनाय प्रदाग्रयणाख्यकर्मनंतरपूजाभिः पितॄन् देवांश्च संतर्प्य कृताग्रयणकाः संतो विगतकल्मषाश्च भवन् ६ प्राज्य
म् रिपणाभवति तथा संपन्नो राज्ञानिविषयः कामोपेक्षांते प्राज्यकामाः संपन्नतरगोरसाः बहुलतरक्षीरदध्यो जनपदाः भवंतीति शेषः तथाभूते षज

नीहारपरुषो लोकः पृथिवी सस्यशालिनी जलान्यनुपभोग्यानि सुभगो हव्यवाहनः ५ नवाग्रयण
पूजाभिरभ्यर्च्य पितृदेवताः कृताग्रयणकाः काले संतो विगतकल्मषाः ६ प्राज्यकामा जनपदाः
संपन्नतरगोरसाः विचरंति महीपाला यात्रार्थं विजिगीषवः ७ सेवमाने दृढं सूर्ये दिशमंत
कसेवितां विहीनतिलकेव स्त्री नोत्तरा दिक् प्रकाशते ८ प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च सां
प्रतं यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः ९ अत्यंतसुखसंचारा मध्याह्ने स्पर्शतः सुखाः
दिवसाः सुभगादित्याः छायासलिलदुर्भगाः १०

नृपदेषु यात्रार्थं शत्रुदर्शनार्थं ७ अंतकसेवितां दिशं दक्षिणां ८ प्रकृत्या स्वभावेन हिमकोशो घनीभूतहिमसमूहः तद्वान् हिमवानिति संज्ञा सांप्रतं यतो दूरसू
र्यः सुव्यक्तं प्रकटं हिमवान् सन् हिमवानिति यथार्थनामा भवति ९ मध्याह्ने सुखः संचारो येषु ते तथा मध्याह्ने स्पर्शतः आतपस्पर्शतः सुख
जनकाः अत एव सुभगादित्याः छायाः सलिलानि च दुर्भगानि असेव्यानि येषु १०॥

74 मीहारः सर्पीवत्केहिमंन इत्यर्थः ऋतुसर्वः पटुशीताः भूम्यारण्या हिमनाशितपर्णत्वात्हिमधवलपंकजाः ११ निहूताकाशशायनाः निहूतानावृतमटे
शाशयनाः पुष्पनीताशुष्पनतेषुनोपि नरात्रिकालपरिमानाः हिमाहताः हिमभूमताः कृपीतवर्णाणहताशव्हः शीतवृतेरेयामत्वाः आयामादैर्घ्यवत्व
त्रियामारात्रयः १२ रवौसंक्रांते सोभाग्यस्तभगत्वउपभोगोपनत्रूपंयसमः तुषारधूसरमंडलः निशासोधोनिशासमलिनश्चादर्शवनप्रकाशते १३

ऋतुसर्वः सनीहारः पटुशीताः समाहिता भूम्यारण्या हिमधवलादिवसाभं निसांगतं ॥ निहूताका-
शशायनाः पुष्पनीता हिमाहताः शीतकूटतरायामा हिमायामा येति सांगतं १२ रविसंक्रान्ते सोभाग्य
स्त्रारुणमंडलः निशासांयतनेदवादर्शश्चंद्रमानकाशते १३ ज्योत्स्नातुषारमलिनापोर्णिमासो
नराजते सीतेवचातपप्रणामालस्यतेनचशोभते १४ प्रकृत्याशीतलस्पर्शो हिमविद्धश्चसांप्रतं
प्रवतापश्चिमोवायुः कालेद्विगुणतलः १५ वाष्पछन्नान्यरण्यानि यववगोधूमवंतिच शोभंते
भ्युदितेसूर्येनदद्भिः क्रौंचसारसैः १६

ज्योत्स्नापोर्णमाज्योत्स्नयेनवेवपौर्णमासीत्वेवलसतेसतामारेणनतशोभतइत्यर्थः १४ प्रकृत्याशीतलस्पर्शः पश्चिमदिग्वायुः सांप्रतंहिमविद्धश्च
कालेप्रातःकालेद्विगुणशीतलः १५ वाष्पछन्नानिरण्यानिप्रातःकालेकृपोदकादिषुवचना दृष्पुष्पाग्राउर्भवति स्तवउभवत्र
मात्रकमितितीर्थः यवगोधूमांकुरेषवपणविद्धदर्शनाहेतेषुचनदर्शनात्वाष्पछन्नानिवाष्पानेश्चलेपीत्यर्थः १६

सी
तारा
प्रती
३८

75 दंतैर्मयूखाकृतिभिः श्वेतवर्णैर्नवनैर्नवकिंचिद्विशालैर्वा किंचिन्नताः कनकप्रभाः परिणतत्वात् नीहारो हिमानि शायन्पो वृ पर्वताग्रदर्शनमस्य हृत
तमः तत्वं वृत्ते रुपमर्षे द्विर्द्व मयूखरूपलतिनः पाषाकसह शासमर्थः १८ प्रगाढवीर्यः ईषतग्रासो लसः सपीतः स्वरवसर्पी १९ प्रवणपारिमविड्ः १०

दंतैर्मयूखाकृतिभिः शिरोभिः पूर्णैस्तरुलैः शोभंते किंचिद्विशालेवाः शालयः कनकप्रभाः १७ मयूखरूपमर्षे
द्विर्हिमनीहारासंवृतैः हरमयुरितःसूर्यः पाषाकरः वलक्ष्यते १८ प्रगाढवीर्यः पूर्वाह्णमध्याह्नस्पर्शतः
सुखः समस्कः किंचिद्गपांडुरातपः शोभतेसितो १९ प्रवणपातिपानेन किंचिच्छक्लिन्नशाद्वलाः व
नानाशोभंते भूमिर्निविष्टतरुणातथा २० स्पष्टभ्रविमलेशीतमुदके हिरदः स्वयं ग्रस्येनतृषितोव
नः प्रतिसंहरतेकरं २१ पतेहिम्समुपासीनाविहगाजलवारिणः नावगाहंतिसलिलमप्रगल्भाइ
वाहवे २२ प्रवणपायतमोनजानीहारतमसावृताः प्रवणाः पश्चवलक्ष्यंतेविप्रष्टावनराजयः २३
वाष्पसंछन्नसलिलारुतविज्ञेयसारसाः हिमार्द्रवालकाकूलैः सरितोभांतिसांप्रतं २४ तुषारपतना
देवमृदवोज्ज्वलकरस्यचैषांमादशाग्रस्तमपिप्रायेणारवसवजल २५

प्रति संहरते करं शुंडः स्पर्शे शोभ्यत्वादिति भावः २१ समुपासीनाजलसमीपदेशमितिशेषः नावगाहंतिनावगाहंते २२ प्रवणपायतमो ध्यांनजा
राजोनीहारतमसावृताः छन्नाः २३ वाष्पोभ्रमः ऊष्मावाप्रगाग्रस्यपवेनायस्यम् २५ ॥

३८

76 तस्याः कालकृतप्रालेयरचितानि पर्णानि शीर्णानि केसराणि कर्णिकाश्च येषां तैः २६ निरुद्धः प्रेतदिनः दुःखिया परनारीविषये निषेधश्च
त्वराह्रीरियान्निवर्तते यस्य सः तदेव जितेंद्रियत्वे ३१ सौख्यानि सौख्यसाधनानि आर्यं त्वां सर्वात्मनाश्रितः त्वत्सहवासवेहारत्वात्सर्वात्मना रतत्वात्।

जलाह्यैरचितैः पत्रैः शीर्णकेसरकर्णिकैः नालशेषाद्दिमध्वस्तान भांतिकमलाकरा २६ अस्मि
न्पुरुषव्याघ्रकालेङ्गःखसमन्वितः तपश्चरति धर्मात्मा त्वद्भक्त्याभरतः पुरे २७ त्यक्त्वाराज्यंचमा
नंच भोगांश्चविविधान्वहून् तपस्वी नियताहारः शेते शीते महीतले २८ सोपिवेलामिमांनूनम
भिषेकार्थमुद्यतः वृतः प्रकृतिभिर्नित्यंप्रयाति सरयूंनदीं २९ अत्यंतसुखसंवृद्धः सुकुमारो हिमा
र्दितः कथंत्वपररात्रेषु सरयूमवगाहते ३० पद्मपत्रेक्षणः श्यामः श्रीमान्निरुदरो महान् धर्मा
त्मा सत्यवादी च ह्रीनिषेधो जितेंद्रियः ३१ प्रियाभिभाषी मधुरो दीर्घबाहुररिंदमः संत्यज्य विवि
धान्सौख्यानार्यं सर्वात्मनाश्रितः ३२ जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना वनस्थमपि ता
पस्ये यस्त्वामनुविधीयते ३३ न पित्र्यमनुवर्तंते मातृकं द्विपदा इति ॥

संत्यागपूर्वकं त्वद्विषयमननादिमाचरति सर्वथा इति कृतकः ३१ स्वर्गो जित एव धीनः कृतः यतो वनस्थमपि त्वां तापसधर्मे स्थित्वा अनुविधीयते अ
वकरोति सेवते इत्यर्थः धीहिदेवादिकस्यरूप ३३ द्विपदा मनुष्याः पित्र्यं स्वभावं नानुवर्तंते किंतु मातृकं स्वभावमनुवर्तंते इति ॥

श्री
वा॰रा॰
आर॰
२९

प्रसिद्धोलोकप्रवादोयंभरतेनान्यथाकृतःपितृस्वभावपरित्यागीकृतोनमातृस्वभावइत्यर्थः २४ एवंभरतंस्तुत्वाकैकेयींनिंदति भरतेत्यादि २५ स्नेहाद्रुदतामा-
धेःस्नेहात २६ नगर्हितव्याइत्येवकानतताहहेःतावेवसर्वोक्तामेव २७ बालिशीक्रियतेज्ञानाश्रयस्यभरतस्यवियोगमसहमानाबालवदल्पज्ञामोतीत्यर्थः

ख्यातोलोकप्रवादोयंभरतेनान्यथाकृतः २४ भरतादशरथोयस्याःसाधुश्चभरतःसुतः कथन्नुसाध्वीकै
केयीतादृशीक्रूरदर्शिनी २५ इत्येवंलक्ष्मणोवाक्यंस्नेहाद्ब्रुवतिधार्मिके परिवादंजनन्यास्तमसहन्रा
घवोब्रवीत् २६ नतेंबामध्यमातातगर्हितव्याकथंचन तामेवेक्ष्वाकुनाथस्यभरतस्यकथांकुरु २७
निश्चितैववृष्टिमेबुद्धिर्वनवासेदृढव्रता भरतस्नेहसंतप्ताबालिशीक्रियतेपुनः २८ संस्मराम्य
स्यावाक्यानिप्रियाणिमधुराणिच हृद्यान्यमृतकल्पानिमनःप्रह्लादनानिच २९ कदान्वहंसमे
ष्यामिभरतेनमहात्मना शत्रुघ्नेनचवीरेणत्वयाचरघुनंदन ३० इत्येवंविलपंस्तत्रप्राप्यगोदावरीं
नदीं चक्रेभिषेकंकाकुत्स्थःसानुजःसहसीतया ३१ तर्पयित्वाथसलिलैस्तैःपितॄन्दैवतानि
पि स्तुवंतिस्मोदितंसूर्यंदेवतांश्चतथानघाः ३२

सत्रहेनेहमेवप्रकाशयति संस्मरामीति प्रियाण्यपिकेनविरुद्धमानानीति कर्णीकहोराणिभवे
तीति मधुराणीति हृद्यानि मेरुवत्तरहृदयबंधनानि सामान्यतामधुर्यश्रुतःतिपायेनाह अमृतकल्पानीतिअतएवमनःप्रह्लादनानि २९

78 रुद्रोऽपमयासंहाराविहितविनतस्तेदर्शयति ४२ इतिरामायणेषोडशःसर्गः १९ ततःश्रवकृतोवरम् १ योवीतिराक्षसःकालिकं पर्णशालोवासः २

कृताभिषेकःसरामःसीताद्वितीयःसहलक्ष्मणेन कृत्वाभिषेकस्तगराजपुत्र्यामहद्भ्रःस्तनेदृश्भगवा
निवेशः ४३ इत्यार्षेरामायणेषोडशःसर्गः १९ कृत्वाभिषेकोरामस्तुसीतासौमित्रिरेवच तस्मात्क्रोस
वरीतीरात्ततोजग्मुःस्वमाश्रमम् १ आश्रमंतमुपागम्यराघवःसहलक्ष्मणः कृत्वापौर्वाह्णिकंकर्म
पर्णशालामुपागमत् २ उवाससुखितस्तत्रपूज्यमानोमहर्षिभिः सरामःपर्णशालायामासीनः
सहसीतया ३ विरराजमहाबाहुश्चित्रयाचंद्रमाइव लक्ष्मणेनसहभ्रात्राचकारविविधाःकथाः ४
तदासीनस्यरामस्यकथासंसक्तचेतसः तंदेशंराक्षसीकाचिदाजगामयदृच्छया ५ सातुशूर्पणखा
नामदशग्रीवस्यरावणस्य भगिनीराममासाद्यददर्शत्रिदशोपमम् ६ दीप्तास्यंचमहाबाहुंपद्मपत्रायते
क्षणम् गजविक्रान्तगमनंजटामण्डलधारिणम् ७ सुकुमारंमहासत्त्वंपार्थिवव्यञ्जनान्वितं राममिन्दी
वरश्यामंकंदर्पसदृशप्रभम् ८ ॥

विरूपाविरूपनलक्षणेन ४ शूर्पणखा नावखमालान संतापयामितिहीयोभवति ६ दीप्तास्यंकोतिमन्त्वंगजस्येवयेमदत्तयाविक्रांतंगमनंयस्य ७ तं

रामा ८

श्री
वा० रा०
आरी
८०

79 सम्भवमित्याद्विषुमान्तेकारोऽत्र ९ दारुणा सुदारुणामितिपाठः दक्षिणं सुभाषिणं वामभाषिणी ॥ शरीरजः कामः तत्वं यथाख्यातुमर्हसि ११ शूर्पणखे
ति यानिकं श्च त्वं बुद्धिनया तपेव १४ नियोगात्पवित्रः नियतः धर्मकांक्षी यानि वाक्यानि वक्षणा रूप धर्माभिलाषी य धर्मार्थं तस्यैव धर्मस्य परिपालनाय १९

बभूवेंद्रोपमं दृष्ट्वा राक्षसी काममोहिता सुमुखं दुर्मुखी रामं वृत्तमध्यं महोदरी ९ विशालाक्षं विरूपा
क्षी सुकेशं ताम्रमूर्धजा प्रियरूपं विरूपा सा सुस्वरं भैरवस्वना १० तरुणं दारुणा वृद्धा दक्षिणं वामभा
षिणी न्यायवृत्तं सुदुर्वृत्ता प्रियमप्रियदर्शना ११ शरीरजसमाविष्टा राक्षसी राममब्रवीत् जटी तापसवे
षेण सभार्यः शरचापधृक् १२ आगतस्त्वमिमं देशं कथं राक्षससेविते किमागमनकृत्यं ते तत्त्वमाख्या
तुमर्हसि १३ एवमुक्तस्तु राक्षस्या शूर्पणख्या परंतपः ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे १४
आसीद्दशरथो नाम राजा त्रिदशविक्रम तस्याहमग्रजः पुत्रो रामो नाम जनैः श्रुतः १५ भ्रातायं लक्ष्मणो
नाम यवीयान्मामनुव्रतः इयं भार्या च वैदेही मम सीतेति विश्रुता १६ नियोगात्तु नरेंद्रस्य पितुर्मातुश्च
यंत्रितः धर्मार्थं धर्मकांक्षी च वनं वस्तुमिहागतः १७ वेदितुमिच्छामि कस्य त्वं कासि कस्य वा त्वं हि।
त्वं वक्तुमर्हसि तत्त्वेन आगताऽसि कस्य कृते भामिनी मे १८

कस्य त्वं कस्य ति पाठः कासि किंनामासि कस्य त्वं पत्नी ति पाठः राक्षसी एवं मनोयोगात्सकामरूपत्वं विना संभवात् कामरूपत्वं वा राक्षसीत्वं विना

[illegible] ८०

80 मदनार्दिता रामदर्शनादिति शेषः १९ यदि ते श्रोत्रमागतः श्रवः कृतपूर्वं भविष्यतीति भावः २१ सदा प्रवृद्धनिद्रस्त्वयं २२ भ्रातरौ खरदूषणौ वि
भीषणादिवत् त्रिशिरःप्रभृतयस्तत्स्वभावतापेक्षः २३ तान् रावणादीन् वीर्येण समतिक्रान्ता तानतोपिकाः तस्मात् समतिक्रान्ता त्वद्भिसरणात्वन्मितम

इहवाकिंनिमित्तंत्वमागतस्तद्ब्रूहितत्त्वतः साब्रवीद्वचनंश्रुत्वाराक्षसीमदनार्दिता १९ श्रूयतांराम त
त्वार्थंवक्ष्यामिवचनंमम अहंशूर्पणखानामराक्षसीकामरूपिणी २० अरण्यंविचरामीदमेकासर्व
भयंकरा रावणोनाममेभ्रातायदितेश्रोत्रमागतः २१ विभीषणस्तुधर्मात्मानतुराक्षसचेष्टितः प्र
वृद्धनिद्रश्चसदाकुंभकर्णोमहाबलः २२ प्रख्यातवीर्यौचरणेभ्रातरौखरदूषणौ तानहंसमतिक्रा
न्तारामत्वापूर्वदर्शनात् २३ समुपेतास्मिभावेनभर्तारंपुरुषोत्तमम् अहंप्रभावसंपन्नास्वच्छंदबलगामि
नी २४ चिरायभवभर्तामेसीतयाकिंकरि

यपरदिने त्वामुपगतास्मीत्यर्थः रामत्वां ता पूर्वदर्शनात् प्रथमदर्शनादारभ्य यद्वा पूर्वदर्शनात्
देवादिषितः प्रागदृष्टदिव्यरूपदर्शनाद्धेतोर्भावेन त्वां पुरुषोत्तमं भर्तारं सर्वजगतोरक्षकं प्राप्तास्मि २४ प्रभावसंपन्ना प्रकृष्टेन भावेन शृंगारेण संप
न्ना यद्वा प्रभावेन सामर्थ्यातिशयेन संपन्ना अत एव स्वच्छंदेन स्वेच्छया बलेन च सर्वलोकगमनशीला पदे च मत्वक्षिरायेति २५ ॥

आत्मनोदेवयोनित्वेदैवेनाभिमतरूपग्रहणसामर्थ्याभिमानेनस्वस्मिन्रामप्रवृत्तमेसीताहवणामा विकृतावेतिविकृतामायास्वरूपतस्तपरिणामेमायावि॰
कारवतीविरूपातानारूपोच्चावचकार्यकरीअतएवअुदग्रकं स्वभावस्तवनसदृशीतिपरमार्थः यथाकृतार्थमस्त एव अहमेवानुरूपाउभयोरपिमा
यापिष्टानत्वादित्यर्थः २९ वैरूप्यमेवाह निर्णतोदरीं अनेनेतनिम्नोदरी असतीस्वप्रहर्षस्तदुस्तानेकसेसाद्धःखदत्वात्कार्यरूपेणसतीं च तया

विकृताचविरूपाचनसेयंसदृशीतव अहमेवानुरूपातेभार्यारूपेणपश्यमां २७ इमामरूपामसंती॰
करालांनिर्णतोदरीं अनेनसहतेभ्रात्राभक्षयिष्यामिमानुषीं २८ ततःपर्वतकूटानिवनानिवि
विधानिच पश्यन्सहमयाकामीदण्डकान्विचरिष्यसि २९ इत्येवमुक्तःकाकुत्स्थःप्रहस्यमदिरेक्ष
णां इदंवचनमारेभेवक्तुंवाक्यविशारद ३० इत्यार्षेरामायणेआरण्यकांडेसप्तदशःसर्गः १७ तां
तुशूर्पणखांरामःकामपाशावपाशितां स्वेच्छयाश्लक्ष्णयावाचास्मितपूर्वमथाब्रवीत १ ॥

मदृष्टोपलालितमेरूप्येवनेआगमन्नाशासंती सतीहिदृष्ट्वानोमस्वादीनांसविधेप्रवयातिअन्यरक्षणायतिष्ठेदित्याशयः १७ २८ २९ इतिश्रीरा
मायणेआरण्यकांडेसप्तदशःसर्गः १७ तामिति कामपाशेनावपाश्रितांसंजातपाशावधां स्वेच्छयेतिपाठे परिहासविनोदेनेत्यर्थः अत
एवस्मितपूर्वमित्युक्तोर्थः स्वच्छंदामितिपाठोप्रकृतः स्वेच्छाचारिणीमित्यर्थः १ ॥

82 कृतदाराः कृतभार्याः भगवतीतिसंबुद्धिः इयंभार्याममदयितात्वद्विधानांचेतिशेषः सपत्नतासपत्न्याउत्तापस्तुभार्यान्तरोद्भिमार्यान्तरसपत्नाद्भूतेभवतिस
पत्नीसाहिंस्यामितिवार्थः अनेनवचनेनव्याजःध्रुवज्ञावः सपत्नीशब्दः असपत्नमकृतिकोपिभवेद्द्वितीयभार्यायामेवरूढ इतिध्येयं २ अकृत
दारः अकृतपरदारपरिग्रहइतिधात्वर्थनामनेकार्थतांदर्सात्रिविहितदारइतिवा लक्ष्मणेष्टार्थः नहिरामोमिथ्यावक्तेतिपरिहासादेर्मिथ्याभाषणेनदोष

कृतदारोस्मिभवतिभार्येयंदयितामम त्वद्विधानांतुनारीणांसुदुःखासमपत्नता २ अनुजस्त्वेष
मेभ्राताशीलवान्प्रियदर्शनः श्रीमानकृतदारश्चलक्ष्मणोनामवीर्यवान ३ अपूर्वीभार्ययाचार्थी
तरुणःप्रियदर्शनः अनुरूपश्चतेभर्तारूपस्यास्यभविष्यति ४ एवंभजविशालाक्षिभर्तारंभ्रा
तरंमम असपत्नावरारोहेमेरुमर्कप्रभायथा ५ इतिरामेणसाप्रोक्ताराक्षसीकाममोहिता
विसृज्यरामंसहसाततोलक्ष्मणमब्रवीत ६ ॥

इत्यतनमस्त्वन्ततेइतिवयं एवमुत्तरत्रापि ३ अपूर्वीइतः प्राक्भार्यासङ्गानभिज्ञः अतएवभार्ययार्थी प्रयोजनवान् अतोनपापयस्त्व इतः एवंपरभा
र्यासङ्गानभिज्ञः भार्ययार्थीस्वभार्यार्थीति अस्यतेरूपस्यायमनुरूपोभविष्यति पर्यंगीकरिष्यतीतिशेषः ४ भर्तारंननेभजेत्यन्वयः भर्तृत्वेनसेवस्व
नियावत् असपत्न्यासौख्यतमितिशेषः अर्कप्रभामेरुंयथाभजतितथाएवविधोपिवादोरामसारस्वप्रतिकाममोहितः प्रामायाः ड्राक्यिककोरे

श्री
वारा
प्राटी
४२

83 शूर्पनखोमितिशुद्धयोगीकं ८ दासस्यमेभार्याभूत्वाकथंदासीभवितुमिच्छसीतियोजना परवान्पराधीनः कमलवर्णानिरुक्तेकमलसदृशवर्णावति ९
पत्नाभिति परमार्थस्त्वविशिष्टरूपोविरूपांत्रैलोक्यसंदोषमतीनविधेनेमासतीयस्याःलोकराज्ञा अवयवसन्निवेशोमेकेनिंग्नोन्नतानिनेतोदंरीनउम

ग्रस्तरूपस्यतेशुक्राभार्याहंवरवर्णिनी मयासहत्वंसर्वान्देशकाम्निचरिष्यसि ७ एवमुक्तस्तुसौमित्रि
शीघ्रतस्यावाक्यकोविदः ततःशूर्पनखीमित्वालक्ष्मणोवुक्तमब्रवीत् ८ कथंदासस्यमेदासीभार्या
भवितुमिच्छसि सोहमार्येणपरवान्भ्रात्राकमलवर्णिनि ९ समृद्धार्थस्यसिद्धार्थामुदितामलवर्णि
नी आर्यस्यत्वंविशालाक्षिभार्याभवयवीयसी १० एनांविरूपामसतींकरालांनिर्णतोदरीं भार्यावृ
द्धांपरित्यज्यत्वामेवैषभविष्यति ११ कोहिरूपमिदंश्रेष्ठंसंत्यज्यवरवर्णिनि मानुषीषुवरारोहेकुर्याद्भा
वंविचक्षणः १२ इतिसालक्ष्मणेनोक्ताकरालानिर्णतोदरी मन्यतेतद्वचःसत्यंपरिहासाविचक्ष
णा १३ सारामंपर्णशालायामुपविष्टंपरंतप सीतयासहदुर्धर्षमब्रवीत्काममोहिता १४
एनांविरूपामसतींकरालांनिर्णतोदरीं वृद्धांभार्यामवष्टभ्यनमांत्वंबहुमन्यसे १५ अद्येमां
भक्षयिष्यामिपश्यतस्तवमानुषीं त्वयासहचरिष्यामिनिःसपत्नायथासुखम् १६

ध्यांसुर्पीतरमपिशशक्तरीत्याइष्टयंवृद्धोत्तानदृष्टां अतारिच ॥ करालाद्रुहणा परिहासाविचक्षणा ततद्धाकेपरिहासवज्ञानादिता १२ यप्यतस्त

४२ वराहे ... ८९ ॥

84 निगृह्य वावेति शेषः १८ अनार्यैः परिहासो न कथमपि कार्यः इत्यत्र सत्यं प्रमाणाय निष्पण्णवैदेहीमत्यपि तमप्रज्ञा सकृतपरिहासदोषादिति शेषः इदं
परिहासेनापमृत्युवचने सत्यनिष्टसर्वामसर्वानर्थमूलविद्याधीमा यावीजा वेदा मूलेवैति कतः इ सौम्य कथं चित्जीवतीमेव पश्य रक्षोकामाश्च १९

इत्युक्ता मृगशावाक्षीमलातसदृशेक्षणा अभ्यगच्छत्सुसंक्रुद्धा महोल्का रोहिणीमिव: १७ तां मृत्युपाशप्र
एकमेकायने कृच्छ्रे निवसंतं महद्रुमे॥ समीक्ष्य दुःखितो रामः सौमित्रिमिदमब्रवीत् राज्याद्भ्रंशो व
ने वासः सीता नष्टा मृतो द्विजः ईदृशीयं ममालक्ष्मीर्दहेदपि हि पावकं २४ संपूर्णमपि चेदद्य प्र
तरेयं महोदधिं सोपि नूनं ममालक्ष्म्या विशुष्येत्सरितां पतिः २५ नास्त्यभाग्यतरो लोके मत्तो ऽ
स्मिन्सचराचरे येनेयं महती प्राप्ता मया व्यसनवागुरा २६ अयं पितृवयस्यो मे गृध्रराजो महाब
लः शेते विनिहतो भूमौ मम भाग्यविपर्ययात् २७ इत्येवमुक्त्वा बहुशो राघवः सहलक्ष्मणः
जटायुषं च पस्पर्श पितृस्नेहं निदर्शयन् २८ निकृत्तपक्षं रुधिरावसिक्तं तं गृध्रराजं परिगृह्य राघवः
क्व मैथिली प्राणसमा गतेति विमुच्य वाचं निपपात भूमौ २९ इत्यार्षे श्रीरामायणे आरण्यकाण्डे सप्तषष्टितमः ६७

रेयं नष्टास्तोपि सरितां परिवृत्तेनिश्चयेन ममालक्ष्म्या विशुष्येत् २५ येनाभाग्येन वागुरा मृगादिबंधनजालं २६ पितृर्वयस्यः सखा २७ पि
तृस्नेहं पितरो च स्नेहं २८ २९ इति श्रीरामायणे आरण्यकांडे सप्तषष्टितमः ६७

302 रौद्रेणारत्नसाग्रेनेनरत्नसोनमःप्राधान्यमेवतिस्त्वितंमित्रसंपन्नंमित्रत्वेनसंपन्नंसर्वजनेषुमैत्र्याद्युक्तं १ तयापतितिविद्रवाणइवस्रुद्दीनोविह्वा-
लेनगम्य २ आहरित्वाहृतम् वंधवश्कार ४ यच्चराधंटष्टात्प्रियासीताहृतासोपाधस्त्रसमयाकिंकृतःअपितननयतःकिलिमितंस्त्रदि

रामः प्रेक्षतांतेरथंध्वविगौद्रेणपातितं सौमित्रिमित्रसंपन्नमिदंवचनमब्रवीत् १ ममायंननमर्थेषु
पतमानाविद्रामः रात्तसेनहृतः सुरवोप्राणान्स्त्यजतिमत्कृते २ अतिविद्रःपारीरुस्मिन्प्राणाल-
त्मणाविधते तथास्वरविहीनोयंविल्कवसमुदीरयते ३ नदृगेयदिशाक्षाबिभाबयाहृतिं पु-
नः सीतामाखाहिमद्रेतवधमाखाहितात्मनः ४ किंनिमित्तोजटायोरावणात्तस्यकिंमया
अपराधंतवपेदष्टारावणेनहृताप्रिया ५ कथंतंचंद्रसंकाशंमुखमासीन्मनोहरं सीतयाकानि-
वोक्तानितस्मिकालेहिजोत्तमः ६ कथंवीर्यःकुपंचपःकिंकर्मासचरात्तसः क्वचास्यभवनेता
तद्ब्रूहिमेपरिष्टब्वतः ७ तमुद्वीह्यसधर्मात्माविलपनमनंतकं वाचाविक्लवयारामभिदंवच
नमब्रवीत् ८ साहृताराक्षसेंद्रेणरावणेनदुरात्मना मायामास्थायविपुलांवातद्दुर्दिनसंकुले
९ परिक्लांतस्यसीतानपत्तौछित्वानिशाचरः सीतामादायवैदेहीप्रयातोदत्तिणामुखः १०

यस्यसःरावणःअपीजहार ५ ८ ७ ८ किंकमैतस्योत्तरं मायामिति वातेनदुर्दिनेचसंकुलाम् १० १० १०

303

श्री वा रा आरं १५२

ग्राम्यधर्मेण रामामर्थे धृतयत् प्राणोपरोधमाह उपेति उशीरेणानलदेन कृता मूर्धजाः केशा येषां तान् सौवर्णान् कृतान् पश्यामि तादृशा सौवर्णीकृत
दर्शनं मरणस्य चिह्नं ॥ ज्योतिषज्ञानबलादाह येनेति १२ कोसौ मुहूर्तस्तत्राह विन्द इति लाभार्थो हि देतिः विन्दो नाम मुहूर्तः सच रावणेन निजकर्मणे
वकर्मानुकूलतया नाबुध्यत् बुधिरवगमने इत्यस्य लङि रूपं वक्केवलं मुहूर्तं न मदर्शनाद् इष्टप्राप्तिरवापि तत्फलं प्राप्स्यामीत्याह झषवेति बडिशा।

उपस्पृश्येति मे प्राणा दृष्टिर्भ्रमति राघव पश्यामि हृतान्सौवर्णानुशीरकृतमूर्धजान् ॥ येनया
तिमुहूर्तेन सीतामादाय रावणः विप्रणष्टं न वेत्ति स्म तत्स्वामी प्रतिपद्यते १२ विन्दो नाम मुहूर्तोसौ
न च काकुत्स्थ सोबुध्यत् झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति १३ न च त्वया व्यथा कार्या जनकस्य
सुतां प्रति वैदेह्या रंस्यसे क्षिप्रं हत्वा तं रणमूर्धनि १४ असंमूढस्य गृध्रस्य रामं प्रत्यनुभाषतः
आस्यात्सुस्राव रुधिरं म्रियमाणस्य सामिषं १५ पुत्रो विश्रवसः साक्षात् भ्राता वैश्रवणस्य च
इत्युक्त्वा दुर्लभान्प्राणान्मुमोच पतगेश्वरः १६ ब्रूहि ब्रूहीति रामस्य ब्रुवाणस्य कृताञ्जले स्त्यक्त्वा
शरीरं गृध्रस्य प्राणा जग्मुर्विहायसं १७

गृहीत्वा झषवद्बडिशं गृह्य क्षिप्रमेव विनश्यति वर्तमाननिर्देशो नीतिसान्निध्यं वि ज्ञापयितुं सूचयति १३ न त्वया चेति १४ असंमूढस्य मृतिकालेप्य-
भ्रान्तस्य रामं प्रत्यनुभाषतः उत्तरं भाषमाणस्य १५ इत्युक्त्वा पतत्त्वन्मात्रमुक्त्वा न द्वीयत्त इत्यादिकथनात् पूर्वमिति शेषः १६ १७

304 अस्मिन् दंडकारण्ये बहूनि वर्षाणि त्वं वसता नेन पादितो ऽहं दंडकारण्ये विपरीर्णदेह विसारणां भ्रामं २० अनेकवार्षिक इत्यस्यैव विवरणं विचारका-
लसमुपस्थित इति २१ मेव पकारीत्यस्य चयः सीतामभ्यवपन्नः सीतां मोचयितुं प्रवृत्तः २३ सर्वत्र सर्वजातिषु २४ तथाग्रान्तमिति छेदः श्रामनामि

स निर्दिष्टपिरोभूमोऽप्रसार्य चरणौ तथा विदिप्य वपरी रेसंपपात धरणीतले १८ तं गृध्रं प्रेक्ष्य ता
म्रांतं गतासुमचलोपमं रामः सुबहुभिर्दुःखैर्दीनः सौमित्रिमब्रवीत् १९ बहूनि रक्षसां वासे वर्षाणि
वसता मया अनेन दंडकारण्ये विशीर्णमिह पक्षिणा २० अनेकवार्षिको यस्तु चिरकालसमुत्थितः
सोऽयमद्य हतः शेते कालो हि दुरतिक्रमः २१ पश्य लक्ष्मण गृध्रोऽयमुपकारी हतश्च मे सीताम-
भ्यवपन्नो हि रावणेन बलीयसा २२ गृध्रराज्यं परित्यज्य पितृपैतामहं महत् मम हेतोरयं प्राणा
न्मुमोच पतगेश्वरः २४ सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः शूराः शरण्याः सौमित्रे तिर्यग्यो
निगतेष्वपि २४ सीताहरणजं दुःखं न मे सौम्य तथागतं यथा विनाशो गृध्रस्य मत्कृते च परंतप
२५ राजा दशरथः श्रीमान्यथा मम महायशाः पूजनीयश्च मान्यश्च तथायं पतगेश्वरः २६

त्यर्थः मन्निमित्तं यो गृध्रविनाशस्तज्जं दुःखं यथा मां प्राप्तं सीताहरणजं दुःखं न तथा प्राप्तं तज्जं दुःखमभिकमिति भावः तस्याः पुनः प्राप्तिसं
भावनासत्वादस्य तदभावाच्चेति तात्पर्यं २५ २६ ॥

305

श्री
वा० रा०
आ० टी०
१५३

दिधक्ष्यामि दग्धुमिच्छामि सत्कृतिसिद्ध्येऽयमर्थः २७ अपरावर्तिनां संग्रामेष्वनिशेषः गम्यत इति गतिर्लोकः यज्ञशीलादीनां लोकान् क्रमेणाप्रा
प्य मदनुज्ञातः सन्ननुत्तमान् येभ्यः उत्कृष्टा न सन्ति तान् लोकान् ब्रह्मणो लोकान् क्रममुक्तिदान् गच्छ अनेन संस्कारमात्रात् कर्मानधिकृत
मिश्रः साधनहीनस्यापि तत्तल्लोकदानेन भगवान् रामः स्वस्वरूपाभासमायावृत्तज्ञान इति प्रलपन्तो ज्ञानबन्धुः शोकादिना न रुदन्ति स्वक

सौमित्रे हर काष्ठानि निर्मथिष्यामि पावकं गृध्रराजं दिधक्ष्यामि मत्कृते निधनं गतं २७ नाथं पतग
लोकस्य चितिमारोपयाम्यहं इमं धक्ष्यामि सौमित्रे हतं रौद्रेण रक्षसा २८ या गतिर्यज्ञशीलानां
माहिताग्नेश्च या गतिः अपरावर्तिनां या च या च भूमिप्रदायिनां २९ मया त्वं समनुज्ञातो गच्छ
लोकाननुत्तमान् गृध्रराज महासत्त्व संस्कृतश्च मया व्रज ३० एवमुक्त्वा चितां दीप्तामारोप्य प
तगेश्वरम् ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखित ३१ ॥

मेवामकृत् मडकं संस्कारमकरोत् तस्य रामो ब्रह्मविधानतः स्वपदं च ददौ तस्मै सोऽपि रामप्रसादतः हरेः समानरूपेण प्रययौ परमं पदमि
ति जटायुश्च पक्षकमप्यग्रे पतेन निरस्तामहिम्नदारिनादाह्लादिप्रक्तमिति निषेधिनि तत् सायुज्यमुक्तिलाभश्चोक्तः २९ मया महर्षिणा सा
मान्यहरिरूपेण ३१ ॥

306 सशमिद्रुमद्भिमारामःमहारोहीनमहामृगान् रोहिशब्दःकांरातोपिस्त्रमवाचीतान्हत्वापिंडदानार्थंमांसमादायागत्यानुभ्रनेनतरंहिजेपद्वि
मदितिशेषःपिंडदानार्थं शाद्वलन्तृणानस्तारं २३ तत्रतन्मांसान्मुन्कृत्यपेशीकृत्वापिंडकृत्पाकेनायददौ ३३ यतन्प्रेतसमस्यस्वर्गा
हीगमनमृदिशपद्याह्मणाःकथयंतितत्स्वर्गगमनेतज्ञमनसाधनं ततस्यद्विपंस्वर्गगमनायरामोजज्ञाप २४ उदकस्यसर्वस्याल्स्नानए

रामोपिसहसौमित्रिर्वनेयावासवीर्यवान् स्थूलान्हत्वामहारोहीनन्तत्स्तारंतेद्विजे २२ रोहि
मांसानिवोद्धृत्यपेशीकृत्वामहायशाः पाकेनायददौरामोरम्येहरितशाद्वले २३ यतन्प्रेतसमस
स्यकथयंतिद्विजातयः तत्स्वर्गगमनंतिप्रेतस्यरामोजज्ञापद २४ ततोगोदावरींगत्वानदींनरव
रात्मजौ उदकंचक्रतुस्तस्मैगृध्रराजायताबुभौ २५ शास्त्रदृष्टेनविधिनाजलंस्नात्वाथराघवौ स्नात्वा
तौगृध्रराजायउदकंचक्रतुस्तदा २६ सगृध्रराजःकृतवान्यशस्करंसुदुष्करंकर्मरणेनिपातितः
महर्षिकल्पेनचसंस्कृतस्तदाजगामपुण्यांगतिमात्मनःशुभाम् २७

वैकत्वंकत्वंदर्शयितुंपुनराहुःशास्त्रेति तत्रपादक्रमादार्थक्रमस्यबलवत्वात् पूर्वंस्नानंततउदकदानेनततःपिंडदानमितिक्रमोबो
ध्यः २८ पुण्यापुण्यैकलभ्यांअतएवशुभांसुतेकस्वभावां ३० ॥

307 पतिसत्तमेतद्दिव्यपितरौ वेमयोः स्थितं बुद्धिं तस्मिन्नित्वबुद्धिं निधाय सीताधिगमे सीतान्वेषणे कर्तव्ये निमित्तमनः प्रवेशपणता दृष्टो निमित्तं दृष्ट्वा
जग्मतुः ३८ इत्यार्षारण्यकाण्डे एकोनसप्ततितमः ६९ पश्चिमामित्यत्र श्लोके रक्त रक्षोकेदत्तणामिव्यक्ते नैरृती जग्मतुरिति तत्त्वम्पेते १ प्रविग्रहन्तं जनाद्यरण्यं २

कृत्वोदकं तौ तावपि पितृसत्तमे स्थितं बुद्धिं प्रणिधाय जग्मतुः प्रवेशपसीताधिगमे ततो मत्वोदकं
त्वरंगावि विविस्तवासवौ ३८ इत्यार्षे रामायणे आरण्यकाण्डे षष्टितमः ६९ कृत्वैवमुदकं तस्मै प्रस्थि
तौ राघवौ तदा अवेक्षन्तौ वने सीतां जग्मतुः पश्चिमां दिशं १ तां दिशं दक्षिणां गत्वा शरचापासि
धारिणौ अविप्रहतमैक्ष्वाकौ पन्थानं प्रतिपेदतुः २ गुल्मैर्वृक्षैश्च बहुभिर्लताभिश्च प्रवेष्टितं
आवृतं सर्वतो दुर्गं गहनं घोरदर्शनं ३ व्यतिक्रम्य तु वेगेन गृहीत्वा दक्षिणां दिशं सुभीमं तन्महार
ण्यं व्यतियातौ महाबलौ ४ ततः परं जनस्थानात् त्रिक्रोशं गम्य राघवौ क्रौञ्चारण्यं विविशतु
र्गहनं तौ महौजसौ ५ ॥

गुल्मादिभिः प्रवेष्टितं व्याप्तं तत एव सर्वतः आवृतं अत एव दुर्गं दुष्प्रवेशं गहनं वनं रूपं पन्थानं प्रतिपेदतुरित्यन्वयः ३ वेगेनातिक्रमात् अविच्छिन्नात्
महारण्यं व्यतीयातौ व्यतिक्रम्य गतौ ४ गम्य गत्वा गहनं दुष्प्रवेशं क्रौञ्चारण्यं क्रौञ्चारण्याख्यं गहनं वनमिति वा ५ ॥

अनेकमेवाचांवनः समन्तस्मात्प्रफुल्लंतद्वनंयस्यां सर्वतः प्रहृष्टमिवपुष्पविकासादिनाजङ्गमंजन्तुहर्षेणाव्रातस्यप्रशस्तस्यव्यपदेशः ९ कौ
वारण्यमतिक्रम्यतद्वनात्पूर्वेणात्रिकोशांगत्वाअंतरेमध्येमार्गे मतंगाश्रमंददृशातः अथचोरत्वादिविशेषणात्तद्वनं मतंगाश्रमवनंदृष्टान्तंत

नानाभेवचनप्रख्यंप्रहृष्टमिवसर्वतः नानावर्णैः शुभैः पुष्पैर्मृगपक्षिगणैर्युतं ६ दिदृक्षमा
णोवैदेहींतद्वनंतौविविक्षतुः तत्रतत्रावतिष्ठन्तौ सीताहरणदुःखितौ ७ ततः पूर्वेणतौगा
त्वात्रिक्रोशंभ्रातरौतदा क्रौंचारण्यमतिक्रम्यमतंगाश्रममंतरे ८ दृष्ट्वातत्तद्वनंघोरंबहुभीमम
गद्विजं नानावृक्षसमाकीर्णंसर्वंगहनपादपं ९ ददृशातेगिरौतत्रदरींदशरथात्मजौ पाताल
समगंभीरांतमसानित्यसंवृतां १० आसाद्यचनरव्याघ्रौदर्यास्तस्याविदूरतः ददृशतुर्महा
रूपांराक्षसींविकृताननां ११ भयदामल्पसत्वानांबीभत्सांरौद्रदर्शनां लंबोदरींतीक्ष्णदंष्ट्रां
करालींपरुषत्वचं १२ भक्षयंतींमृगान्भीमान्विकटांमुक्तमूर्धजां अवेक्षेतांतुतौतत्रभ्रातरौरामल

उच्यमानविशेषणंतत्रगिरौदरींददृशाते ८ तस्याविदूरतइतिसंधिरार्षः तद्दरीसमीपेइत्यर्थः ११ बीभत्सांजुगुप्सितांपरुषत्वचंकर्कशत्व
वंकरालींतुंगशरीरांकरालोभीषणोतुंगः १२ विकटामतिस्थूलाकारांतत्रतत्रास्थानेपिनिम्नोन्नतोवा १३

309 भ्रातरामस्याग्रतोव्रजंतंपद्मिंस्पावदेस्तुकेसप्रश्कारलोपश्चार्षःसमालेभतगृहीतवंती १४ उपगृह्यालिंगयअथोभ्रुवेमन्वेषेनामहंतेनबलाभः
निध्यादिवलाभरूपास्मित्वमेपियाभतीसि १५ प्राणुश्चिरंविरमाप्नुः १६ कर्णीनासात्तनमितिसमाहारद्वंद्वः १७ कर्णीनासेइतिसप्तमी १८ त

श्री
वाल्मी
कीय
१५५

सासमासाद्यतौवीरौव्रजंतंभ्रातुरग्रतः पद्मिंस्पावदेस्तुकासमालेभतलक्ष्मणं १४ उवाचचैवंनंवच
नंसौमित्रिमुपगम्यच अहंतवेयंसावीनामलाभस्त्वमसिप्रियः १५ नाथपर्वतदुर्गेषुनदीनांपुलि
नेषुच आप्नुश्चिरमिदंवीरत्वमयासहवंस्यसे १६ एवमुक्तस्तुकुपितस्तवसुत्रमलक्ष्मणः कर्णीना
सात्तनतस्यानिचकर्तारिसूदनः १७ कर्णीनासेनिकृतेतुविस्वरंविननादसा यथागतंप्रदुद्राव
राक्षसीघोरदर्शना १८ तस्यांगतायांगहनंव्रजंतौवनमोजसा आसेदतुरमित्रघ्नौभ्रातरौरामल
क्ष्मणौ १९ लक्ष्मणस्तुमहातेजाःसत्ववान्शीलवान्शुचिः अब्रवीत्प्रांजलिर्वाक्यंभ्रातरंदीप्ततेज
सं २० स्पंदतेमेदृढंवाहुरुद्विग्नमिवमेमनः प्रायशश्चाप्यनिष्टानिनिमित्तान्युपलक्षये २१ तस्मात्स
ज्जीभवार्यत्वंकुरुष्ववचनंमम ममैवहिनिमित्तानिसद्यःशंसंतिसंभ्रमं २२

स्यांगतायांपश्चाद्व्रजंतौगहनंदुष्प्रवेशोवनंआसेदतुः १९ बाहुर्वामः अनिष्टानिदुःसूचकानि २१ सज्जीभवयत्नोभवसंभ्रमंभयं २२ ॥

310 ततः कंचिद्व्यक्तं नमत्याह एष इति वंचुलकः केदवालः वंचुलकश्चपि अनेनप्रक्रमवषयं भावि विजयमेव सूचितं २३ अन्वेषतोः सीतामि
ति शेषः आजसा सामर्थ्येन २४ तद्वनं वनमत्यन्तमातरिश्वना संवेष्टितमिवासमिवजातं ततस्तस्य वनस्य मध्ये शब्दोभवत् २५ तं शब्दं कांक्ष

एष वंचुलको सम पक्षी परमदारुणः आवयोर्विजयं युद्धे पांसन्निव विनर्दति २३ तयोरन्वेषतोरे
वं सैन्यं तद्वनमोजसा संजज्ञे विपुलः शब्दः प्रभंजन्निव तद्वनं २४ संवेष्टितमिवात्यर्थं गहनं मा
तरिश्वना वनस्य तस्य शब्दोभूद्वनमापूरयन्निव २५ तं शब्दं कांक्षमाणस्तु रामः खड्गी सह भ्रा
त्रा ददर्श सुमहाकायं राक्षसं विपुलोरसं २६ आसेदतुश्च तद्रक्षः तावुभौ प्रमुखे स्थितम्
विवृद्धमशिरोग्रीवं कबंधमुदरे मुखम् २७ रोमभिर्निशितैस्तीक्ष्णैर्महागिरिमिवोच्छ्रितं
नीलमेघनिभं रौद्रं मेघस्तनितनिस्वनम् २८

माणः तद्रक्षस्य तिनिमित्तं कांक्षमाणः २६ आसेदतुर्ददृशतुः विवृद्धं विवृद्धाकारं अशिरोग्रीवं अनुत्पत्रकबंधं अन्वर्थनामकम् उदरे
मुखं अग्रमूर्धमस्तकादिसत्वक २७ निशितैरित्यस्य विवरणं तीक्ष्णैरिति उपलक्षितमिति शेषः रोमभिर्निशितैस्तीक्ष्णैरिति कचित्पाठः २८

311

श्री
वाम
पुरा
१५९

इत्यामानविशेषणेनललाटस्थोनैकेननयनेनोरःप्रदेशोन्नगीतशिरस्त्वात् उरसि उरःप्रदेशेंतरूपलभ्यमानेनदृष्टेनोपलक्षितं लेलिहानंमा-
हापक्ष्मेणेत्याद्यै २९ विकुर्वाणं विक्षिपंतं ३१ आकर्षंतं हस्ताभ्यांनाभिमुखेनकर्षंतं विकर्षंतं प्रतिष्ठानमृगान्मुंचंतं ३२ प्रपन्नयोःप्रयानमित्रिशे

अग्निज्वालानिकाशेनललाटस्थेनदीपिता महापक्ष्मेणपिंगेनविपुलेनायतेनच २९ एकेनोरसिघोरे
णनयनेनाशुदर्शिना माहादंष्ट्रोपपन्नंतंलेलिहानंमहामुखं ३० भक्षयंतंमहाघोरानृक्षसिंहमृगद्वि-
पान् घोरौभुजौविकुर्वाणमुभौयोजनमायतौ ३१ कराभ्यांविविधान्गृह्यऋक्षान्पक्षिगणान्मृगा
न् आकर्षंतंविकर्षंतमनेकान्मृगयूथपान् स्थितमावृत्यपंथानंतयोर्भ्रात्रोःप्रपन्नयोः अथतस्स
मतिक्रम्यक्रोशमात्रेददर्शतुः ३३ महांतंदारुणंभीमंकबंधंभुजसंवृतं कबंधमिवसंस्थानादति
घोरप्रदर्शनं ३४ समहाबाहुरत्यर्थंप्रसार्यविपुलौभुजौ जग्राहसहितावेवराघवौपीडयन्बलात् ३५
खड्गिनौदृढधन्वानौतिग्मतेजौमहाभुजौ भ्रातरौविवशंप्राप्तावाकृष्यमाणौमहाबलौ ३६

षः आवृत्यस्थितंतंतेजाम्नानम् भुजवेष्टनंसमतिक्रम्यहेभेस्थितौतक्रोशमात्रेददर्शतुः स्वजाभ्यांजंतून्संवृणोतीतिभुजसंवृतं तंसंस्थानान् देहस्थित्याश्र-
शिरःकुक्षलंलक्षणंकबंधवत्स्थितं ३४ सहितौनैकमपिमुक्तमर्थः ३५ तिग्मतेजौतीक्ष्णतेजसौनाटयावेषयत्नोविवशौविवशौप्राप्तौबलाकृष्य

६
हरि
१५९

312 तत्रतस्यामवस्थायांभ्रातृनाश्रयात्धैर्यस्येतिशेषः धैर्यानालंबनादित्यर्थः तत्रहेतुर्बाल्यंवाव्रुद्धिहेतुइत्सत्वाप्रधानत्वं श्रुतान्नाश्रयत्वादितिपाठेआश्रया
भावतस्यरामस्यापिकर्तव्यस्यनात्वतत्वादित्यभावः ३७ निर्मुक्तः निर्योजितरक्षोबलिः सततुंकिंचित्स्ववपामात्मानंपरित्यज्यस्वपलायनेनेतिशेषः

तत्रयेयोर्बभूवस्तुराघवौनैवविव्यथे बाल्यादनाश्रयाच्चैवलक्ष्मणस्त्वभिविव्यथे ३७ उवाच ॥ वि
षक्तः सन्राघवराघवावुभौ पश्यमांविवशंवीरराक्षसस्यवशंगतः ३८ मयैकेनतुनिर्मुक्तः परिमु
च्यध्वंराघव मांदिष्ट्वात्वबलिंदत्वापलायस्वयथासुखं ३९ अधिगन्तासिवैदेहीमचिरेणेतिमेम
तिः प्रत्यलभ्यचकाकुत्स्थपितृपैतामहींमहीं ४० तत्रमारामराज्यस्थः सर्वंमर्हसिसर्वदालक्ष्म
णेनैवमुक्तस्तुरामः सौमित्रिमब्रवीत ४१ मास्मत्रासंकृथावीरनहित्वादृग्विषीदति एतस्मिन्नन्तरे
क्रूरोभ्रातरौरामलक्ष्मणौ तावुवाचमहाबाहुः कबंधोदानवोत्तमः कौयुवांवृषभस्कंधौमहाखड्ग
धनुर्धरौ ४३ घोरदेशमिमंप्राप्तौदैवेनममचाक्षुषौ वदतंकार्यमिहवांकिमर्थंचागतौयुवां ४४

तस्यैवविवरणम्मुखमर्धंमांदृष्ट्वेति भूतबलिंमद्याभूतानाकारस्तेबलिमित्यर्थः ३९ अधिगन्तासिमाः ४० ४१ एतस्मिन्नन्तरेइत्तिलक्ष्मणविषाद
निवृत्तिफलकरामाश्वासनसमयेइतिशेषः ४२ दैवेनदैवगत्याममचाक्षुषौवक्ष्गोचरौ ४४

श्री
भाग
आर॰
१५७

313 एवंकार्यादिकंपृष्टातद्रूपेऽस्यस्वप्रयोजनंसंपन्नमित्याह इमंदेशमिति इहनिवृत्तःस्वथातेस्यममभाणादिनंदेशमनुप्राप्तौ ४५ ततःकिंतत्राह
दुर्लभमिति ४६ मुखेनपरिशुष्यतोपलक्षितलक्ष्मणमुवाच देहमात्यविक्रमकृच्छ्रात्कष्टात्कृच्छ्रतरंराज्यभ्रंशवनवासप्रियापहारादि प्राप्य
स्थितयोरावयोस्तांप्रियामप्राप्यैवजीवितनाशायेदंव्यसनंप्राप्तं यदेवमतःसर्वेष्वपिभूतेषुकालस्यवीर्यंसुमहत् अनर्गलप्रचारम॰

इमंदेशमनुप्राप्तौतथातेस्येहनिवेदितः सवाणचापखड्गेनतीक्ष्णशृंगाविवर्षभौ ४५ मांतूर्णमनुसं
प्राप्तौदुर्लभंजीवितंहिवां तस्येतद्वचनंश्रुत्वाकबंधस्यदुरात्मनः ४६ उवाचलक्ष्मणंरामोमुखेन
नपरिशुष्यता कृच्छ्रात्कृच्छ्रतरंप्राप्यदारुणंसत्यविक्रमः ४७ व्यसनंजीवितांतायप्राप्तमप्र
प्राप्यतांप्रियां कालस्यसुमहद्वीर्यंसर्वभूतेषुलक्ष्मण ४८ त्वांचमांचनरव्याघ्रव्यसनैःप
पश्यमोहितौ नातिभारोस्तिदैवस्यसर्वभूतेषुलक्ष्मण ४९ शूराश्चबलवंतश्चकृतास्त्राश्चर
णाजिरे कालाभिपन्नाःसीदंतियथावालुकसेतवः ५० ॥

स्यीतिशेषः ४७ कृतोयत्नस्तांचेति
महाबलपराक्रमावपिव्यसनैर्दुःखैर्मोहितौकालःकरोतीतिपश्यपश्यन्न्यथेसैवप्रपंचनंनहीतिनातितीतियावांतरं ४९ ५०

३५ उग्रविक्रमः उत्कटपराक्रमो रामः सौमित्रिमेवेक्ष्य दीनमिति शेषः स्वां मतिमात्मना आत्मवैभवेन स्थिरामकरोत् ईषदपि विषादं न प्राप्तवानित्यर्थः ५५
प्रकृते लक्ष्मणस्यापि लोकव्यवहारनाट्यमवेमन्य ५१ इति श्रीरामायणे आरण्यकांडे सर्गः ६९ बाहुपाशपरिक्षिप्तौ बाहुभ्यां पाशाकारेण प

इति ब्रुवाणो दृढसत्यविक्रमो महायशा दाशरथिः प्रतापवान् अवेक्ष्य सौमित्रिमुदग्रविक्रमः स्थिरां त
दा स्वां मतिमात्मनाकरोत् ५५ इत्यार्षे रामायणे आरण्यकांडे एकोनषष्टितमः सर्गः ६९ तौ तु तत्र स्थि
तौ दृष्ट्वा भ्रातरौ रामलक्ष्मणौ बाहुपाशपरिक्षिप्तौ कबन्धो वाक्यमब्रवीत् १ तिष्ठतः किं नु मां दृष्ट्वा क्षु
धार्तं क्षत्रियर्षभौ आहारार्थं तु संदिष्टौ दैवेन गतचेतनौ २ तच्छ्रुत्वा लक्ष्मणो वाक्यं प्राप्तकालं हितं
तदा उवाचार्तिं समापन्नो विक्रमे कृतनिश्चयः ३ त्वां च मां च पुरा तूर्णमादत्ते राक्षसाधमः तस्मा
दसिभ्यामस्याशु बाहू छिन्दावहे गुरू ४ भीषणोऽयं महाकायो राक्षसो भुजविक्रमः लोकं ह्यति
जितं कृत्वा ह्यावां हन्तुमिहेच्छति ५ ॥

रिक्षिप्तौ १ क्षुधार्तं मां दृष्ट्वा भीतौ नु किं तिष्ठतं यतो मे आहारार्थं संदिष्टौ अतो न जीवनसंभावनेत्यर्थः २ ३ पुरा आदत्ते आदास्यतीत्यर्थः ४
भुजमात्रेण विक्रमो यस्य न त्वायुधेनेत्यर्थः अतिजिते सर्वथा पराजिते ५

श्री
वा०
प्राती
१५८

315 ब्रस्य बाहू छेदप्रवृत्तो न तु प्राणवियोजनमित्याह निस्त्रिंशाभ्यामिति शस्त्रादिभिर्विकृतदीनानां जगतीपतेः तत्रियमस्य कृतवर्मणे शमानां पशूनां
वधइव यथा स्वर्गफलतोपि शास्त्रविहितोपि कृन्तितः सामप्रातं न जलाशुकरी स्याः धर्मजनकत्वात् लोकदृष्ट्याच कृन्तितः पतेनतद्वधस्यापीषत्
पापफलदत्वमुचितं केचित्तु कृतवर्मणा यज्ञपतीनामिति पाठं प्रज्ञानजेनकल्पयित्वा कृतवर्मणाद्मनवतीतां तां बधोयथा कृन्तितइतिव्याचख्युः

निस्त्रिंशाभ्यां बधोराजन् कृन्तितो जगतीपतेः कृतवर्मण्योपनीतानां पशूनामिव राघव ६ पतन्तं ज्वलितं
कृत्वा नयोः क्रुद्धस्त्वरान्वितः विदार्य संपतन्तौ तौ रौद्रं तौ भक्षयितुमारभत ७ ततस्तौ देशकालज्ञौ खड्गा
भ्यामेव राघवौ अच्छिंदतां सुसंरब्धौ बाहू तस्यांसदेशयोः ८ दक्षिणो दक्षिणं बाहुमसक्तमसिना त
तः चिच्छेद रामो वेगेन सव्यं रामस्य लक्ष्मणः ९ स पपात महाबाहुश्छिन्नबाहुर्महास्वनः खं च गां च
दिशश्चैव नादयन् जलदो यथा १० स निकृत्तौ भुजौ दृष्ट्वा शोणितौघपरिप्लुतः दीनः पप्रच्छ तौ वी
रौ कौ युवामिति दानवः ॥ इति तस्य ब्रुवाणस्य लक्ष्मणः शुभलक्षणः शशंस तस्य काकुत्स्थं क
बंधस्य महाबलः १२ ॥

ते ६ तयोरेतत्संज्वलितं कृते तस्मिं बंधः भक्षयितुमारभत हस्ताभ्यां समाकृष्टवानित्यर्थः ७ ससंरब्धौ एकदलीकांडछेदेनेव तच्छेदेन ह
स्तस्य बलाभावात् ८ दक्षिणः समर्थः दक्षिणपार्श्वस्थोवा ९ गोभूमिः कौ युवामिति पप्रच्छ पूर्वमप्राप्नोत्तरत्वात् पुनः प्रश्नः ॥ १२

१५८

316 इक्ष्वाकुदायादः दशरथपुत्रः १३ यामिच्छंतौ याम् अन्वेषयंतौ १५ विचेष्टसे चेष्टमानस्तिष्ठसि मर्त्यः १६ प्रीतः शापमोक्षकालश्रवणाभिज्ञानात् त
दिंद्रवचनं वक्ष्यमाणं १७ बाह्वोर्बंधनं ययोस्तौ रंसदेशयोस्तौ बाहू बंधनौ वसदेयो १८ यथाविनयात् याहृष्टाविनयाद्यामतक्ष्णगःश्यन्वयः १९

अयमिक्ष्वाकुदायादो रामो नाम जनैः श्रुतः तस्यैवावरजं विद्धि भ्रातरं मां च लक्ष्मणं १३ मात्रा प्रतिहृते ।
राज्ये रामः प्रव्राजितो वने मया सह चरत्येष भार्यया च महद्वनं १४ अस्य देवप्रभावस्य वसतो विजने
वने रक्षसापहृता भार्या यामिच्छंताविहागतौ १५ त्वं तु को वा किमर्थं वा कबंध सदृशो वने आसी
नोरसि दीप्तेन भग्नजंघो विवेष्टसे १६ एवमुक्तः कबंधस्तु लक्ष्मणेनोत्तरं वचः उवाच वचनं प्रीत ।
स्तदिंद्रवचनं स्मरन् १७ स्वागतं वां नरव्याघ्रौ दिष्ट्या पश्यामि वामहं दिष्ट्या चेमौ निकृत्तौ मे वाभ्यां
बाहुबंधनौ विरूपं यच्च मे रूपं प्राप्तं ह्यविनयाद्यथा तन्मे शृणु नरव्याघ्र तत्त्वतः शंसतस्तव १९ इत्या ।
र्षे रामायणे आरण्यकांडे सप्ततितमः सर्गः ७० पुरा राम महाबाहो महाबलपराक्रम रूपमासीन्ममा ।
चिंत्यं त्रिषु लोकेषु विश्रुतं १ यथा सूर्यस्य सोमस्य शक्रस्य च यथा वपुः सोऽहं रूपमिदं कृत्वा लो ।
कवित्रासनं महत् २ ॥

इति श्री रामायणे आरण्यकांडे सप्ततितमः सर्गः ७० अचिंत्यमचिंत्यवैभवं १ तदेवाह यथेति इदं रूपं रक्षोरूपं वैभवेन कृत्वा २ ॥ ॥

श्री
वा॰रा॰
आदि
१५९

317 ऋषीन्नत्रासमापानीमन्वयः २ परशुक्लः ४ एवंशापार्थपतदेवेति एतदेवरूपं नृशंसंकुरविगर्हितंमांतिमवदत् ५ अभिशापकृतस्यम
कृतेकवन्धरूपेणेनतयाकृतस्यास्यशापस्यांतोभवत्विति याचितः तेनैवयाचितेनहवयाद यदेतितदाहविदेवंपुलमन्तमेश्रियाविराजितं
रूपंप्राप्स्यसइतितेनभाषितमितिसंबंधः एवंहृत मां दनोःपुत्रविद्धीमन्वयः श्रियाविराजितैःपुत्रेन्द्रनुर्ज्वविद्धिलक्ष्मणेतिपाठांतरं तदास्थियः दी

ऋषीन्वनगतान्राम त्रासयामि ततस्ततः ततःस्थूलशिरा नाम महर्षिः कोपितो मया ३ स चिन्वन्विवि
धं वन्यं रूपेणानेन धर्षितः तेनाहमुक्तः प्रेक्ष्यैवं घोरशापाभिधायिना ४ एतदेव नृशंसं ते रूपमस्तु विग
र्हितं स मया याचितः क्रुद्धः शापस्यान्तो भवेदिति ५ अभिशापकृतस्येति तेनेदं भाषितं वचः यदा छित्वा
भुजौ रामस्त्वां दहेद्विजने वने ६ तदा त्वं प्राप्स्यसे रूपं स्वमेव विपुलं शुभं श्रिया विराजितं पुत्रं दनो
स्त्वं विद्धि लक्ष्मण ७ इन्द्रकोपादिदं रूपं प्राप्तमेवं रणाजिरे अहं हि तपसोग्रेण पितामहमतो
षयं ८ दीर्घमायुः स मे प्रादात्ततो मां विभ्रमोस्पृशत् दीर्घमायुर्मया प्राप्तं किं मां शक्रः करिष्यति ९

नाज्ञोदानवस्यपुत्रंदत्वंदनुनामानमित्यर्थः ६ ननुकुत्सितरूपत्वेशापेपिकथंकबंधरूपताप्राप्तित्याह इंद्रेति तच्छापबीजमाह अहमिति ऋषि
शापतः घोररूपप्राप्त्यानंतरं उग्रेणतपसापितामहमतोषयं स्वकुलोत्तंसोऽद्यादिभयेनेतिशेषः ८ विभ्रमोगर्वस्तमेवाह दीर्घमिति ९॥

318 वानपर्वणापातयारेण ९ सविषतीति नाभ्यपोगाभोगोपलक्षणं शरीरे शरीरमध्यस्थे उदरमार्गे एवंभूते नो धीधार यावद्व्यवहारवदितेन मयामरणं या
यमानोपि तत्राकरोत् ॥ किमिति नाकरोत् तत्राह पितामहेति वहवोदीर्घा घुदीनरूपे २ विचित्रणात्यायाभिहितः जीवितं कथं शक्र इमन्वयः

इत्येवं बुद्धिमास्थाय स गोपा शक्रमथर्षयं तस्य वाहुं प्रमुक्तेन वज्रेणापानपर्वणा ९ सविषनी च शिरश्चै
व शरीरे संप्रवेशितं समयायाच्यमानस्तानयद्यमसादनं ॥ पितामहवचः संस्मृत्य तदुक्तिमिस्मा व
वीत अनाहारः कथं शक्तो भग्नसविषशिरोमुखः २ वज्रेणाभिहतः कालं सदीर्घमपि जीवितं
स एवमुक्तः शक्रो मे वाहू योजनमायमौ ३ तदा चास्यं च मे कुक्षौ तीक्ष्णादंष्ट्रमकल्पयत् सोहं भुजा
भ्यां दीर्घाभ्यां संक्षिपास्मिन्वनेचरान् १४ सिंहद्वीपिमृगव्याघ्रान्भक्षयामि समन्ततः स तु मामव्र
वीदिन्द्रो यदा रामः सलक्ष्मणः १५ छेत्स्यते समरे वाहू तदा स्वर्गं गमिष्यसि अनेन वपुषा तात वने
स्मिन्राजसत्तम १६ यद्यत्पश्यामि सर्वस्य ग्रहणं साधु रोचये अवश्यं ग्रहणं रामो मन्येहं समुपैष्य
ति १७

एवमुक्तः अनाहारस्य शक्रिय(?) कथं जीवनमित्युक्तः १३ वनेचरान्वने संचारवतः १४ १५ सर्वस्य ग्रहणं साधु रोचये न किंचिदप्यभक्ष्यबुध्या
त्यजामीत्यर्थः इत्थं शरीरस्य च वाक्यविश्वासादवश्यं रामो मह्यं ग्रहणमेष्यतीति मन्यमानस्तिष्ठामि १७ ॥

श्री
वा रा
आ टी
१९०

३१९ ममदेहस्यासंस्कारे देहस्यागे कृतश्रमः कृतयत्नो रामो ममदत्तेग्रहणमे पत्नी निश्मां बुद्धिं पुरस्कृत्य सर्वस्य ग्रहणं माधुरोचयेथ्र थमेव रामो भवदिति बुध्वा
किमपित्यजामीत्याशयः १९ सर्वेषारोहावरं तवबुद्धिमित्रं चोपदेक्ष्यामि १९ हवनादत्तेनात्मनावह्निसंस्कारं करिष्यामि मम साहाय्यकर्विस्यामा

इमां बुद्धिं पुरस्कृत्य देहन्यासकृतश्रमः स त्वं रामोसि भद्रं ते नाहमन्येन राघव १८ शक्यो हन्तुं य
थातत्वमेवमुक्तं महर्षिणा बुद्धिमतिसाचिव्यं करिष्यामि नरर्षभ १९ मित्रं चैवोपदेक्ष्यामि युवा
भ्यां संस्कृतोग्निना एवमुक्तस्तु धर्मात्मा दनुना तेन राघवः २० इदं जगाद वचनं लक्ष्मणस्योपशृ
ण्वतः रावणेन हृता भार्या सीता मम यशस्विनी २१ निष्क्रान्तस्य जनस्थानात्सह भ्रात्रा यथासुखं
नाममात्रं तु जानामि न रूपं तस्य रक्षसः २२ निवासं वा प्रभावं वा वयं तस्य न विद्महे शोकार्ताना
मनाथानामेवं विपरिधावतां २३ कारुण्यं सदृशं कर्तुमुपकारेण वर्ततां काष्ठान्यानीय भग्ना
नि काले शुष्काणि कुञ्जरैः २४ धक्ष्यामस्त्वां वयं वीर श्वभ्रे महति कल्पिते स त्वं सीतां समाचक्ष्व येन वा

येनाहृतेदमिति २० यथासुखं वनमन्वयः २१ नाममात्रं प्राप्तस्य न दोषो वा क्वास्ति नि भावः २१ उपकारेण वर्ततां नामस्माकं सदृशाश्रुचितं
कारुण्यं सीताहर्तृदेशादिकथनरूपमुपकारं कर्तुमर्हसि २३ दाहविषयेन याचितः स न कार्यं साहकाष्ठानीति कल्पिते देवकृते येनक

१९०

320 कल्याणंतवव्याख्यानरूपंदास्येएवमेदिव्यज्ञानसाधनंतत्कुरुततःपरंसर्वंवक्ष्यामीत्याह एवमिति कृपालोवक्तावक्तृताचतुर्यवान् वक्तारंश्रुपास्त
वक्तारं २७ यत्नंसाध्येतिशेषः तत्परंव्याहाम्यरं २८ विज्ञानमतीन्द्रियविषयं २९ स्वकृतकर्मानविनकर्मणा ३० तेनयोगादसंज्ञास्यजिनेकस्या

कुरुकल्याणमस्यर्थेयदिजानासितत्त्वतः एवमुक्तस्तुरामेणवाक्यंधनुरनुत्तमं २६ प्रोवाचकुश
लोवक्तावक्तारमपिराघवं दिव्यमस्तिनमेज्ञानंनाभिजानामिमैथिलीं २७ यस्तांवक्ष्यतितंवक्ष्ये द
ग्धःस्वंरूपमास्थितः योभिजानातितद्रक्षस्तद्वक्ष्येरामतत्परं २८ अदग्धस्यहिविज्ञातुंशक्तिरस्ति
नमेप्रभो राक्षसंतंमहावीर्यंसीतायेनहृतातव २९ विज्ञानंहिमहद्भ्रष्टंशापदोषेणराघव स्वकृ
तेनमयाप्राप्तंरूपंलोकविगर्हितं ३० किंतुयावन्नयात्यस्तंसविताश्रान्तवाहनः तावन्मामवटेक्षि
प्त्वादहरामयथाविधि ३१ दग्धस्त्वयाहमवटेन्यायेनरघुनंदन वक्ष्यामितमहावीरयस्तंवेत्स्यतिरा
क्षसं ३२ तेनसख्यंचकर्तव्यंन्याय्यवृत्तेनराघव कल्पयिष्यतितेवीरसाहाय्यंलघुविक्रम ३३ नहित
स्यास्त्यविज्ञातंत्रिषुलोकेषुराघव सर्वान्परिसृतोलोकान्पुरावैकारणांतरे ३४ इत्यार्षेरामाय
णेआरण्यकांडेसप्ततितमःसर्गः ७७

स्वकृतेनतीनिमित्तचरितेन ३३ कारणांतरेकस्मिंश्चिन्निमित्तेजातेसतीत्यर्थः ३४ इतिरामायणेआरण्यकांडेसप्तसप्ततितमःसर्गः ७७ ५

श्री
वा० रा०
आटी
१८१

321 पद्धरं गतं आसाद्य कबंधं आग्नेय सर्वैः काष्ठानि दत्वा तत्र वाग्निं ददतुः १ मेदसा पूर्णत्वात्तिशोषः मेदःपूर्णत्वात् मंदं ददाह दहतःपददत् ३
अरजे निर्मले ४ चितायाउत्पपात भास्वरः कांतिमान् सर्वप्रत्यंगेषु करवरणादिषु भूषणानि यस्य ५ हंसयुक्ते रामकृत संस्का।

एवमुक्तौ तु तौ वीरौ कबंधेन नरेश्वरौ गिरिप्रदरमासाद्य पावकं विससर्जतुः १ स लक्ष्मणस्तु महोल्काभिर्ज्वलिताभिः समंततः चितामादीपयामास सा प्रजज्वाल सर्वतः २ तच्छरीरं कबंधस्य घृतपिंडोपमं महत् मेदसा पच्यमानस्य मंदं दहति पावक ३ स विधूय चितामाशु विधूमोऽग्निरिवोत्थितः अरजे वाससी बिभ्रन्माल्यं दिव्यं महाबलः ४ ततश्चितायावेगेन भास्वरो विरजोंबरः उत्पपाताशु संहृष्टः सर्वप्रत्यंगभूषणः ५ विमाने भास्वरे तिष्ठन् हंसयुक्ते यशस्करे प्रभया च महातेजा दिशो दश विराजयन् ६ सोंतरिक्षगतो वाक्यं कबंधो राममब्रवीत् शृणु राघव तत्वेन यथा सीतामवाप्स्यसि ७ ॥

स्वप्रभावेन पूर्वतपः प्रभावेन चैवं भूतं विमानं प्राप्तः स्वतत्वेन परमार्थतउच्यमानमिति शेषः ७ ७ ७ ७

१८१

322 अथ प्रतिज्ञातमुपायमाह रामषडिति षड्युक्तयः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्या लोके संति याभिर्युक्तिभिः सर्वं वस्तुजातं राज्ञा विमृश्यते तत्र दशांतेन दुर्दशापरिमृष्टः सन् दशाभागेन दशाभागः दुर्दशापरिपाककालस्तत्प्रशमेन सेव्यते इति नीतिः तस्मात्वयाप्युपायः समाश्रयः कार्यः स्वार्थः परिष्वष्ट इति पाठे दशांतेन दुर्दशापरिपाककालेनार्थानिः प्रेषित इत्यर्थः ८ नन्वहं दशाभागप्राप्त इति कथं ज्ञायते इति

राम षड्युक्तयो लोके याभिः सर्वं विमृश्यते परिहृष्टो दशान्तेन दशाभागेन सेव्यते ८
दशाभागगतो हीनस्त्वं हि राम सलक्ष्मणः यत्कृते व्यसनं प्राप्तं त्वया दारप्रधर्षणम् ९
तदवश्यं त्वया कार्यः स सुहृत्सुहृदां वर अकृत्वा न हि ते सिद्धिमहं पश्यामि चिंतय
न् १० श्रूयतां राम वक्ष्यामि सुग्रीवो नाम वानरः भ्रात्रा निरस्तः क्रुद्धेन वालिना
शक्रसूनुना ११ ऋष्यमूके गिरिवरे पंपापर्यंतशोभिते निवसत्यात्मवान्वीरश्च
तुर्भिः सह वानरैः १२ ॥

तं ज्ञापयाह दशाभागगत इति यतस्त्वं सह लक्ष्मणेन एव हीनराज्यादिरित्यर्थः यत्कृते यद्दशाभागनिमित्तं त्वया दारप्रधर्षणं प्राप्तं तेन ज्ञायते त्वं दुर्दशाभोगकालं प्राप्त इति ९ यदेवमतस्त्वया समाश्रयस्तद्दशाभागप्रशमः सुहृत्कार्यः तत्करणावश्यकर्तव्यत्वमाह अकृत्वेति १० तादृशः सुहृत्कं इत्यत आह श्रूयतामिति ११ पंपापर्यंतेन पंपाप्रदेशेन शोभिते चतुर्भिः मंत्रिभिरिति शेषः १२ ॥

श्री
वा० रा०
आ० टी०
१९२

323 तेजो वा अग्न्यादीनाममितप्रभः अपरिच्छिन्नकांतिः १३ द्युतिमान् तत्तु एणांनो वास्तवक्वबोधनायोत्साहिकस्य विस्तुनः कथनं १४ हे राम तम
विष्यतीति हि १५ यद्भवितव्यं रामस्य भ्रंशादायरागादिदुःखं तदन्यथा कर्तुं केनापि न शक्यमिति अतः शोके मनो माकृथा इति शेषः तेऽ
स्माटीनां पुनर्गतिस्तत्र रामदुःखेन तस्यापितः खितत्वान्नदोषाय १६ तं गच्छेत्तं वयस्यं कुर्विति अन्वयः १७ परस्परद्रोहपरिहाराय अग्निसाक्षि

वानरेंद्रो महावीर्यस्तेजस्वी चामितप्रभः सत्यसंधो विनीतश्च धृतिमान्मतिमान्महान् १३ दक्षः प्रग
ल्भो द्युतिमान्महाबलपराक्रमः भ्रात्रा विवासितो वीर राज्यहेतोर्महात्मनः १४ स ते सहायो मित्रं च
सीतायाः परिमार्गणे भविष्यति हि ते राम मा च शोके मनः कृथाः १५ भवित`` व्यं हि यच्चापि न तच्छ
क्यमिहान्यथा कर्तुमिक्ष्वाकुशार्दूल कालो हि दुरतिक्रमः १६ गच्छ शीघ्रमितो वीर सुग्रीवं तं म
हाबलं वयस्यं तं कुरु क्षिप्रमितो गत्वाद्य राघव १७ अद्रोहाय समागम्य दीप्यमाने विभावसौ न
च ते सोऽवमंतव्यः सुग्रीवो वानराधिपः १८ कृतज्ञः कामरूपी च सहायार्थी च वीर्यवान् शक्तो
ह्यद्य युवां कर्तुं कार्यं तस्य चिकीर्षितः १९

कं सख्यं कार्यमित्याह अद्रोहायेति १८ तस्य विशेषकत्वाद् द्रवमति ज्ञातो न कार्येषु हेतुमाह कृतज्ञ इति ननु स किमर्थं वयात्तदहे सेत्यीक
र्णेदन्याह सहायार्थीति नवाचाभ्यामयाकाभ्या कस्तस्य सहायार्थं इत्यत आह शक्तो हीति तस्य चिकीर्षितं कार्यं कर्तुं युवां शक्तौ वित्या।

३
५
टि
टि
१९२

324 नत्वतस्यतिरश्चोः सत्वाद्दाधेकापाकिरत्याह सकृतार्थः तथाकृतप्रयोजनः करिष्यमाणप्रयोजनोपि न वाकार्यं सीतान्वेषणादि त्वं सकरिष्य
त्येवतथासामर्थ्यप्रयोजकंकतकुलीनतामाह सऋक्षेति पुत्रः तेजनरस्यार्थः १० तदेवाह भास्करस्यौरसः निकृतकिल्बिषः कृतवैरः तपवया

कृतार्थो वाकृतार्थो वा तव कृत्यं करिष्यति सऋक्षरजसः पुत्रः पंपामटति शंकितः ९ भास्करस्यौर
सः पुत्रो वालिना कृतकिल्बिषः सन्निधायाग्रुपंत्तिप्रेमश्यमूकालयं कपि ॥ कृत्याश्च वयमस्येन यवा
स्यवनचारिणः स हि स्थानानि कात्स्नेन सर्वाणि कपिकुञ्जरः १२ नरमांसाशिनां लोके नैपुणेनाधिग
च्छति न तस्याविदितं लोके किंचिदस्ति हि राघव १३ यावत्सूर्यः प्रतपति सहस्रांशुः परंतप स नदी
विपुलाः शैलान् गिरिदुर्गाणि कंदरान् १४ अन्विष्य वानरैः सार्धं पत्नीं तेधिगमिष्यति वानरांश्च महा
कायान्प्रेषयिष्यति राघव १५ दिशो विचेतुं तां सीतां त्वद्वियोगेन शोचतीं अन्वेष्यति वरारोहां मै
थिलीं रावणालये १६ ॥

लितः शंकितः इति तमग्निसन्निधानाद्वा पृष्ठतः सन्निधाय संस्थाप्य वनेकपिं वयस्यं कुरु दिश्यतः स राजन्स्थानानि सर्वाणि जानाति ११ अधिगमि
ष्यति ज्ञास्य २४ रावणालये शोचंतीमिति संबंधः अनेन ज्ञानयत्ने सर्वदिक्षु रावणालयासंति तथा किं दिव्यरावणालयेश्वति ज्ञाने सर्वे दिग्विचयन २८

325 पुनिर्दिशांनिर्मलां अनेनसीतापुइवंतापितं १७ आरात्यकांडेहिमवतितमः ७२ परिमोर्गेणेउपाये दर्शयित्वा पुनर्वाक्यमब्रवीत् १ यत्रप्रकाशंतेतत्रा
गंगांनमेघशिखः अडुष्टःपथो: २ पत्रेकेतवाद जंबूध्नमादि ३ धन्वानाधवाःनामहृतोनागकेसरः ४ अप्रखोःप्रकृष्ठरःसरक्तारक्तचंदनापा

श्री
वारा
ग्राटी
१९३

समेयेकृष्णागणनामनिर्दिशंश्रुतिशपपातालनतेपिवाश्रितांसर्वेगमानामृषभस्तवप्रियंभतिदूत्तरामांशिघ्र
नःप्रदास्यति २१ रामायणेमतितमः ७२ दर्शयित्वातरामायसीतापापरिमार्गणे वाक्यमन्वर्थ
मार्थज्ञःकबंधःपुनरब्रवीत् १ एषग्रामशिवःपंथायत्रैतेपुष्पितादुमाः प्रतीचींदिशमाश्रित्यप्रकाशं
तेमनोरमाः २ जंबूप्रियालपनसान्यग्रोधप्लक्षतिंदुकाः अश्वत्थाःकर्णिकाराश्चचूताश्चान्येचपादपा
धन्वनागास्तिलकानक्तमालकाः नीलाशोकाकदंबाश्चकरवीराश्चपुष्पिता ४ अग्निमु
ख्याअशोकाश्चसुरक्ताःपारिभद्रकाः नानारूपाश्चथवाभूमौपातयित्वाचतालया ५ फलान्यमृत
कल्पानिभक्षयित्वागमिष्यथ तदतिक्रम्यकाकुत्स्थवनंपुष्पितपादप ८ नंदनप्रतिमंत्वन्यत्कुरुस्व
त्वत्तराइव सर्वकालफलायत्रपादपामधुरस्रवाः ७ सर्वेचऋतवस्तत्रवनेचैत्ररथेयथा फला
भारनतास्तत्रमहाविटपधारिणः ८

रिभद्राकोमंदाराःवलानानवृद्धानभूमौपातयित्वापाववाधरवाभूमिपर्यसनाम ५८ ममतगमिष्यथेतिपोषःउत्तरःकुरुवच्च ७ विटपाःशा

॥ ८ ॥
१९३

चक्रमेतौ वंक्रस्यमारोण १० तीर्थमवतारमार्गः प्रविश्य प्राशैवलसंवंधेन पादभ्रंशादेतं ११ संजातवाल्लकामितिदीप्रार्थः लवामंडुकाः १२ वधसाको
विदाः वधमजानानाः १३ द्विजान् पक्षिणः रोहितामत्स्यविशेषाः चक्रं तंशनलमीनाश्चनपव १४ प्रयस्तमान् स्थूलाग्रेपक्वान् प्रकृष्णाश्

शोभंते सर्वतस्तत्र मेघपर्वतसन्निभाः नानारूपाश्च वा भूमौ पानपिनाश्चवासवं ९ फलान्यमृत
कल्पानि लक्ष्मणास्ते प्रदास्यति चक्रमेतौ वरामौ लभ्यौ लाभ्छैलेवनादने १० ततः पक्षिणि वीरौ पं
पानाम रामिषप्रियः प्राकां रामविभ्रंपोसमतेर्णामशैवलो ११ रामसंजातवाल्ककोकमलोत्पलशोभि
तो तत्र हंसास्तवाः क्रौंचाः कररवश्चैवराघव १२ वलाश्रवाणि जेतिपंपासलिलगोचराः नोद्विजंते
नरान् दृष्ट्वावधस्याकोविदाः प्रभा १३ घृतपिंडोपमान् स्थूलान्तान्द्विजान्भत्तपिष्यथ रोहितांश्च
क्रतुश्चनलमीश्चराघवपंपायामिषुभिर्मत्स्यान् १४ तत्ररामवरान् हृष्टान् निस्त्वक्तानयस्तमान
कृशानेककंटकान् नवभक्ष्यामममा पुक्तोल लक्ष्मणः संप्रदास्यति भंशतान्वादतो मत्स्यान् पंपा
याः पुष्पसंचये २८

नेके चकं टकायेषां विद्यंते तान् १५ पुष्पसंचये पम्पादिपुष्पसमूहे वर्तमाने १९

श्री वा रा टी १८४

327 ग्रनपवपग्रापिग्रहिक्लिष्टमलादिकश्मलहीनं १७ पुष्करपर्णेणानपयोर्येन अद्भूतमतस्यान्वा रतस्तेजलं पायप्यतीति संबंधः गिरिगुहा सद्मान्यासनं येषांतान् १८ पेतानन्नजलपानं कृतवतः विटपी विटपिनः आर्षमेकत्वमात्म धारिणीः पुष्पवतः तादृशापि शिवोदकं च वरदृष्टा।

पद्मगंधि शिवं वारि स्वच्छं शीतमनामयं उत्फुल्लशतपत्राढ्यं सुपक्वस्फटिकसन्निभं १७ अथ पुष्करपर्णे
न लक्ष्मणः पास्यति स्थूलान् गिरिगुहाशायिनो वानरान्वनचारिणः १८ सा याह्येविचरन्ग्राममद्य पी
पिष्यति लक्ष्मणः अपां लोभादुपावृत्तान्वृषभानिवर्द्दतः १९ स्थूलामीतांश्च पंपायाद्रक्ष्यसि त्वं नरोत्त
म सा याह्येविचरन्ग्राम विटपीमाल्यधारिणी शिवोदकं च पंपायां दृष्ट्वा शोकं विहास्यसि सुमनोभि
श्चितास्तत्र तिलकान्नक्तमालकाः उत्पलानि च फुल्लानि पंकजानि च राघव नैनानि कश्चिन्माल्या
नि तत्रारोपयिता नरः २२ नचैवम्लानतां यांति न च शीर्यंति राघव मतंगशिष्यास्तत्रासन्नृषयः सु
समाहिताः २३ तेषां भाराभितप्तानां वन्यमाहरतां गुरोः ये प्रपेतुर्महीं तूर्णं शरीरात्स्वेदबिंदवः २४
तानि माल्यानि जातानि मुनीनां तपसा तदा स्वेदबिंदुसमुत्थानि न विनश्यंति राघव २५

शोकं हास्यसि २० अयाम्यविशेषकहूंतृणिदर्शनीयासार सुमनोभिरिति २१ आरोपयितागृहीतां धारयिता महावनमात मलयणसंचारा। भावेनेत्यर्थः २२ अम्लानाशीर्णत्वेहेतुमतंगेत्यादि २३ भारीणतप्तानां गुर्वर्थंमाह्रियमाणावन्यभारेणश्रातानानानि माल्यानीति विधे

७५ अरण्यकांडे १८४

328 शबरीनामशबरीमात्या श्रमणीतापसी २६ तां दृष्ट्वा स्वर्गलोकंगमिष्यति सर्वाजितत्सत्वदर्शनस्यैवमहात्म्यात् स्वर्गलोकोऽत्रब्रह्मलोक इतिव
दति देवलोकमितिपाठेऽपिसएवार्थः २७ तदाश्रमस्थानंशबरीवासत्रूपमतंगाश्रमस्थानंग्रस्यश्राश्रमेषुगुरुतम २८ नागा गजाः तत्रतदाश्रमेत
स्मिन्मतंगाश्रमेत्यर्थः यद्यपितत्रविविधानायाः संतितथापिमतंगस्यविधानात्सभावात् तदेकदेशमतंगाश्रमेनसंचारइत्यर्थः २९ अनेन

तेषांगतानामद्यापिदृश्यतेपरिचारिणी श्रमणीशबरीनामकाकुत्स्थचिरजीविनी २६ त्वांतुधर्मेस्थि
तानित्यंसर्वभूतनमस्कृतं दृष्ट्वादेवोपमंरामस्वर्गलोकंगमिष्यति २७ ततस्तद्रामपंपायास्तीरमा
श्रित्यपश्चिमं आश्रमस्थानमतुलंगुह्यंकाकुत्स्थपश्यसि २८ नतत्राक्रमितुंनागाःशक्नुवंतितदाश्र
मे ऋषेस्तस्यमतंगस्यविधानात्तच्चकाननं २९ मतंगवनमित्येवविश्रुतंरघुनंदन तस्मिन्नंदन
संकाशेदेवारण्योपमेवने ३० नानाविहगसंकीर्णेरंस्यसेरामनिर्वृतः ऋश्यमूकस्तुपंपायाः
पुरस्तात्पुष्पितद्रुमः ३१ सुदुःखारोहणश्चैवशिशुनागाभिरक्षितः उदारोब्रह्मणाचैवपूर्व
कालेभिनिर्मितः ३२ ॥

त्तद्वनंमतंगवनमित्येवविश्रुतं देवारण्यंनंदनादितत्सदृशं ३० पंपायाःपंपातीरवर्तिमतंगाश्रमादित्यर्थः ३१ सुदुःखारोहणःउच्चत्वात्
द्वैतंतरमणाद् शिशुभिर्नागैःसर्पैरभिरक्षितः उदारोदातात्रब्रह्मणापूर्वकालेसृष्टिकालेऽभिनिर्मितः विशेषोदार्यायतपःप्रभावेननिर्मितः ३२

श्री
वारा
ग्राही
१९५

329 प्रोदार्यमेवदर्शयति शाद्यानइति २२ अस्यमप्रतिपाद्यमाह यइति तत्रैवतमइदेव २४ पिशुनागानांवालगताना २५ रुधिरधारावि:इदंपद्दा
कमदधाराभिःसक्ताःसवंद्धाःसद्दराम समयसवंरतिहष्टकवीर्णामृत्रति २८ नीलमणिवकोमलकान्तीत २८ स्पेनानमनुष्यरहा

शाद्यानःपुरुषोनामतस्यशैलस्यमूर्धनि यःस्वमेलभतेवित्तंतस्यवृद्धोपिगच्छति २३ यस्त्वेनंवि
षमाचारःपापकर्माधिरोहति तत्रैवपद्दंरंतेनस्वममारोपयन्तस्मात् २४ ततोपिशिशुनामाना
माक्रंदःश्रूयतेमहान् क्रीतानामपापानामतेगाश्रमवासिनां २५ सक्ताःरुधिरधाराभिःसद
त्यपरमहीपाः प्रवर्तंतिदृष्टकीर्णामेघवर्णास्तरस्विनः २६ तेनतत्पीतापानीयविमलंचारु
शोभनं ग्रस्यंतमस्यसंस्पर्शंसर्वरोगापसमन्वितः २७ निर्हृतात्मविगाह्नेतेवनानिवनगोचराः २
तात्रद्दीपिनश्चैवनीलकोमलकप्रभा २८ रुद्दनपेताजनयानदृष्टाशोकंप्रहास्यति शमत
स्यतशैलस्यमहतेशोभनेगृहा २९

पलापितान् प्रजयानप्राणिनपद्दीनान् ग्रनेनाक्रूरप्राप्रयाप्ताधारणांविरुमाद्दामोति २९ ॥ २९ २९

330 शिलापिधानेति गुहाद्वारमेति नीर्यः विशेषणमित्यतो ५० तस्यां गुहायां ५१ कदाचिदिति पर्वतस्य शिखरे ये ति पिधानाच्च ५० प्रस्थितो यावांस
ग्रीवसमीपं प्रस्थितौ त्वं व्रजस्व पुण्यलोकमिति शेषः ग्रेनिके समीपे वर्तमाने देवभूतनादूचतुः ५४ सनाभ्याकृतावमतिकतकः कबंधः ५५

शिलापिधाना काकुत्स्थ दुःखं वास्याः प्रवेशनं तस्या गुहायाः प्राग्द्वारे महान् शीतोदको ह्रदः ५०
बहुमूलफलो रम्यो नानानगसमाकुलः तस्यां वसति धर्मात्मा सुग्रीवः सहवानरैः ५१ कदाचिच्छिख
रे तस्य पर्वतस्यापि तिष्ठति कबंधस्त्वनुशास्यैवं तावुभौ राम लक्ष्मणौ ५२ स्रग्वी भास्करवर्णाभः खे
व्यरोचत वीर्यवान् तं तु खस्थं महाभागं तावुभौ रामलक्ष्मणौ ५३ प्रस्थितौ त्वं व्रजस्वेति वाक्यमूच
तुरंतिके गम्यतां कार्यसिद्ध्यर्थमिति तावब्रवीत्स च सुप्रीतौ तावनुज्ञाप्य कबंधं प्रस्थितौ तदा ५४
स तत्कबंधः प्रतिपद्य रूपं वृतः श्रिया भास्वरसर्वदेहः निदर्शयन् राममवेक्ष्य खस्थः सख्यं कुरुष्वेति तदा
भ्युवाच ५५ इत्यार्षे रामायणे आरण्यकांडे सप्तसप्ततितमः सर्गः ७३

उक्तार्थं पंसद्वारः सन्निति निदर्शयन्
मार्गादिकमिति शेषः किं विहंगत्वा पुनः राममवेक्ष्य सख्यं कुरुष्वेत्युवाच ५५ इत्यार्षे रामायणटीकायां त्रिसप्ततितमः सर्गः ७३

प्रष्टुः कबंधेनकथितंतंमार्गंगृहीत्वापंपामुद्दिश्यप्रतीचींदिशमातस्थतुः गतवंतौ १ आचितानेकानविचिन्वानौनेकानाम्भोरुहाण्यादाय

तौकबंधेनतंमार्गंपंपायादर्शितंवने आतस्थतुर्दिशंगत्वाप्रतीचींनृवरात्मजौ १ तौशैलेष्वाचिता-
नेकानक्षौद्रपुष्पफलद्रुमान् वीक्षंतौजग्मतुर्द्रष्टुंसुग्रीवंरामलक्ष्मणौ २ कृत्वाचशैलपृष्ठेतुतौ
वासंरघुनंदनौ पंपायाःपश्चिमंतीरंराघवावुपतस्थतुः ३ तौपुष्करिण्याःपंपायास्तीरमासाद्य
पश्चिमं अपश्यतांततस्तत्रशबर्यारम्यमाश्रमं ४ तौतमाश्रममासाद्यद्रुमैर्बहुभिरावृतं सुरम्य
मभिवीक्षंतौशबरीमभ्युपेयतुः ५ तौतुदृष्ट्वातदासिद्धासमुत्थायकृतांजलिः पादौजग्राहराम
स्यलक्ष्मणस्यचधीमतः ६ पाद्यमाचमनीयंचसर्वंप्रादाद्यथाविधि तामुवाचततोरामःश्रम
णींधर्मसंस्थितां ७ कच्चित्तेनिर्जिताविघ्नाःकच्चित्तेवर्धतेतपः कच्चित्तेनियतःकोपआहारश्चत
पोधने ८ कच्चित्तेनियमाःप्राप्ताःकच्चित्तेमनसःसुखं कच्चित्तेगुरुशुश्रूषासफलाचारुभाषि
णि ९

मूलपुष्पफलानि २ उपतस्थतुःप्रापतुः ३ तेपावर्याश्रये ५ सिद्धासिद्धयोगा ६ विघ्नास्तपोविघ्नाःकामादयःकोपोनियतःनिगृहीतःआहार

332 प्रत्यवस्थिताभिमुखंस्थितां ९ अद्यप्राप्तातपःसिद्धिरित्यादिपावद्वीपांउपचारवनपरमार्थाइयावादः ॥ स्वर्गोब्रह्मलोकःदेववरेसर्वोत्तम
ति १२ अक्षयान् लोकान् अपुनरावृत्तिकान् ब्रह्मलोकान् १३ चित्रकूटमितितदाप्रभृतिचैवभगवन्माज्ञादित्यर्थः इतःआत्मीयाश्रमात् १४ आ

रामीणतापसीदृष्ट्वासासिद्धासिद्धसंमता श्रमणीसशबरीवृद्धारामायप्रत्यवस्थिता ९ अद्यप्राप्तात
पःसिद्धिस्तवसंदर्शनान्मया अद्यमेसफलंजन्मगुरवश्चसुपूजिताः ॥ अद्यमेसफलंतप्तंस्व
र्गश्चैवभविष्यति त्वयिदेववरेरामपूजितेपुरुषर्षभ १२ तवाहंचक्षुषासौम्यपूतासौम्ये।
नमानद गमिष्याम्यक्षयांल्लोकांस्त्वत्प्रसादादरिंदम १३ चित्रकूटंत्वयिप्राप्तेविमानैरतु।
लप्रभैः इतस्तेदिवमारूढायानहंपर्यचारिषं १४ तैश्चाहमुक्ताधर्मज्ञैर्महाभागैर्महर्षि
भिः आगमिष्यतितेरामःसुपुण्यमिममाश्रमं १५ सतेप्रतिगृहीतव्यःसौमित्रिसहितोऽ।
तिथिः तंचदृष्ट्वावरान्लोकानक्षयांस्त्वंगमिष्यसि १६ १७

गमिष्यति अत्रप्रत्यायेतिशेषः १५ तेत्वया
तंदृष्ट्वाअस्माकंसेवाफलभूततद्दर्शनंप्राप्यअक्षयान् लोकान्ब्रह्मलोकंप्रत्येकवचनाभिप्रायेणागणाभिप्रायेणवाबहुवचनम् १६ १७॥

श्री
वरा
प्राटी
१९२

333 एवमुक्ताहं पुरुकैतो मयानुद्रष्टव्यं वन्यं संचयं कृत्वा परिरक्षितमा धुर्यपुतं संविज्ञमित्यर्थः तदुक्तं पाये शबरीप्रस्तावे प्रत्युद्गम्य प्रणम्याथ निवेश्य विष्टरे पादप्रक्षा
लनं कृत्वा तौ यथापूजयामास तयोरेवं स्म धार्यपीतावावमे पुष्पैरथार्चयत्फलानि च सुपक्वानि मूलानि मधुराणि च स्वयमास्वाद्य माधुर्यं परीक्ष्य
परिभक्ष्य च पश्चान्निवेदयामास राघवाभ्यां दृढव्रता फलान्यास्वाद्य काकुत्स्थस्तस्यै मुक्तिं परां ददाविति १७ विज्ञाने ज्ञानार्थमागतत्वात् ब्रह्मबहि
ष्कृतां नात्यज्ञानवतीमित्यर्थः इति तीर्थः विज्ञाने ब्रह्मविद्यायां मे श्रेष्ठा अविदर्बहिष्कृतां तत्राप्यधिकारिणीमित्यर्थः इति कतकः विशिष्टज्ञाने

एवमुक्ता महाभागैस्तदाहं पुरुषर्षभ मया तु संचितं वन्यं विविधं पुरुषर्षभ १७ तवार्थे पुरु
षव्याघ्र पंपायास्तीरसंभवं एवमुक्तः स धर्मात्मा शबर्या शबरीमिदं १८ राघवः प्राह विज्ञान
तां नित्यमबहिष्कृतां दनोः सकाशात्तत्त्वेन प्रभावं ते महात्मनो १९ श्रुतं प्रत्यक्षमिच्छामि संद्र
ष्टुं यदि मन्यसे एतत्तु वचनं श्रुत्वा रामवक्त्रविनिःसृतं २० शबरी दर्शयामास तावुभौ तद्वनं
महत् पश्य मेघघनप्रख्यं मृगपक्षिसमाकुलम् २१

वा संवेद्योपस्याः एतस्वेद्यपन्देहे विज्ञाने इति संवेद्य तां नित्यमबहिष्कृतां भोजनादिव्यवहारादिति शेषः तदुक्तमाद्यारादिव्यवहारादिति संगीकृ
त्येति च शेषः इत्यन्ये किमाह तदाह दनोरिति महात्मनां वद्वाचार्याणां दनोः सकाशात् श्रुतं प्रत्यक्षं कर्तुमिच्छामीति शेषः संद्रष्टुं यदि मन्य
से संदर्शयितुं योग्यं यदि मन्यसे इत्यर्थः १९ २० मेघघनप्रख्यं घनीभवन्मेघवत्कृष्णं मेघवदालोकनीयं यद्वा २१

334 मत्वेवगवन्नंतमवपोमाद्दिमाविश्वंतंप्रसिद्धाः मंत्रपूजितं मंत्रस्यागच्छाज्जयेनपूजितमनिष्ठइत्तीडेदेइपंजरंतार्थमितिपादेपिसपवार्थः मंत्रवत्
तद्धोममंत्रवतज्जह्नवांचक्रिरेइत्तनवेतः यद्धातीर्थंचरंजह्नवांचक्रिरेकृतंवेतः समर्थः २२ प्रथमकस्थलीतिनाम्नीवेदीयत्रयस्यांमसत्कृताप्रसन्नपू
ज्याः मेमत्संवंधिनस्तेगुरवः कुमाड्डेपिभिः कपवद्विर्वेउतरवात् करैः पुष्पोपहारंदेवताभ्यः कुर्वंतः २३ तेषांमहात्मनांप्रभावमेवयं

मंतेगवनमित्येवविष्णुंतंरघुनंदन २१ इत्तेभावितात्मानोगुरवोमेमहाद्युते जह्नवांचक्रिरेतीर्थंमे
त्रवत्क्षेत्रपूजितं २२ इयंप्रथमकस्थलीवेदीयत्रतेमेसुसत्कृताः पुष्पोपहारंकुर्वंतिकुमाड्डेपिभिः
करैः २३ तेषांतपःप्रभावेनपश्यपाषाणापिस्वयंसमध्यो नंदतीदिशःसर्वाःश्रियावेयतलप्रभा २४
प्राकृवद्भिस्तैर्गतमुपवासश्रमालसैः चिंतितेनागतान्पश्यसमेतान्सप्तसागरान् २५

वेदीतत्पूजाकालद्वारापिसर्वादिशोयोनंदयंती ग्रतलप्रभाद्दश्यते २४ प्राप्यायौतरंदर्शयतिप्राकृवद्भिरितिसागरादितीर्थंगंतुमप्रा
कृवद्भिरसमर्थैः तत्रहेतुरुपवासश्रमालसैः कृच्छ्रादिरूपस्तपो पवासैर्जनितेनश्रमेणालसैर्दुर्वलैः ईदृशैस्तैश्चिंतितेनध्यानेनतदभिषेक
तीर्थेप्रागतान्सप्तसागरान्समेतान्पश्य २५ ॥

श्री
वा०रा०
आर०
१९८

335 आश्चर्यांतरमाह कृताभिषेकैरिति नविशुष्यंतीतिस्थैर्येभयात्ततएवैवभवानेवतपोवैभवाद्वेतिभावः २६ आश्चर्यांतरमाह देवेति कृतानिदत्तान्य
तिमूढकुवलयसहितानिपुष्पाण्यद्यापिम्लानत्वंयांतितपःप्रभावादितिशेषः २७ उपसंहरतिकृत्स्नमितिदृष्टंत्वयाद्रष्टव्यंत्वयामया
श्रावितं अभ्यनुज्ञातात्वयेतिशेषःततस्त्वत्सान्निध्येकलेवरंत्यक्ष्यामीतिइच्छामि २८ येषांमुनीनामयमाश्रमः येषांचाहंपरिचारिणी

कृताभिषेकैस्तैर्न्यस्तावल्कलाःपादपेष्विह अद्यापिनविशुष्यंतिप्रदेशेरघुनंदन २६ देवकार्याणि
कुर्वद्भिर्यानीमानिकृतानिवै पुष्पैःकुवलयैःसार्धंम्लानत्वंननयांतिवै २७ कृत्स्नंवनमिदंदृष्टंश्रोत
व्यंचश्रुतंत्वया तदिच्छाम्यभ्यनुज्ञातात्यक्ष्याम्येतत्कलेवरं २८ तेषामिच्छाम्यहंगंतुंसमीपंभाविता
त्मनां मुनीनामाश्रमोयेषामहंचपरिचारिणी २९ धर्मिष्ठंतुवचःश्रुत्वाराघवःसहलक्ष्मणः प्रह
र्षमतुलंलेभेआश्चर्यमितिचाब्रवीत ३० तामुवाचततोरामःशबरींसंशितव्रतां अर्चितोहंत्वयाभ
द्रेगच्छकामंयथासुखं ३१ इत्येवमुक्ताजटिलाचीरकृष्णाजिनांबरा अनुज्ञातातुरामेणहुत्वा
त्मानंहुताशने ३२ ३२ ३२ ३२

तेषांभावितात्मनांमदाश्रमदाश्रमसंश्रितपरमात्मनांसमीपंगंतुमहमिच्छामीतिचाब्रवीत २९ कृतार्थमुद्दिश्यतिशेषः ३० संशि
तव्रतांसंशितव्रता ३१ आत्मानंहुताशनेहुत्वाश्चावायीयादिष्टमार्गेणात्वर्थः ३२ ॥

336 स्वर्गं ब्रह्मलोकमेव २३ यत्र ब्रह्मलोके नक्षत्रं पस्थाने शबरी श्रात्म समाधिना जगाम ब्रह्मसमाधिने सर्यः २५ आरण्यकांडे वनः सप्ततितमः सर्गः ७४

ब्रह्मत्वावकसंकाशा स्वर्गमेव जगाम ह दिव्याभरणसंयुक्ता दिव्यमाल्यानुलेपना २३ दिव्यांबरध
रा तत्र बभूव प्रियदर्शना विराजयंतीतं देशं विद्युत्सौदामनी यथा २४ यत्र ते सुकृतात्मानो विहरंति
महर्षयः तत्पुण्यं शबरी स्थानं जगामात्मसमाधिना २५ इत्यार्षे रामायणे आरण्यकांडे वनः सप्तति
तमः सर्गः ७४ दिवं तु तस्यां यातायां शबर्यां स्वेन तेजसा लक्ष्मणेन सह भ्रात्रा चिंतयामास राघवः १
चिंतयित्वा तु धर्मात्मा प्रभावं तं महात्मनां हितकारिणमेकाग्रं लक्ष्मणं राघवोऽब्रवीत् २ दृष्टो मयाश्र
मः सौम्य बह्वाश्चर्यः कृतात्मनां विश्वस्तमृगशार्दूलो नानाविहगसेवितः ३ सप्तानां च समुद्रा
णां तेषां तीर्थेषु लक्ष्मणः उपस्पृष्टं च विधिवत्पितरश्चापि तर्पिताः ४ प्रनष्टमशुभं यत्नः कल्याणं
समुपस्थितं तेन त्वेतत्प्रहृष्टं मे मनो लक्ष्मण संप्रति ५ हृदये मे नरव्याघ्र शुभमाविर्भविष्यति
तदागच्छ गमिष्यावः पंपां तां प्रियदर्शनां ६ ॥ ८ ॥

दिवं त्विति १ महात्मनोः प्रभावं शबर्युक्तं २ तेषां सप्तानां समानां समुद्राणां तीर्थेषु लोकापकारायैते स्थापितेषु उपस्पृष्टं स्नातं ४ तेन कल्याणोपस्था

रा. ७ उत्तरकांडे ८

श्री
वा० रा०
आ० टी०
१९९

337 अंशुमतः सूर्यस्य ७ त्वरेत्वरामि ८ । ममापि त्वरते पंपादर्शने इत्यर्थः १० पानीयवाहिनीं पापानाह्लादि निमग्नस्य स्वरसपीत निर्मलजलः वाहिनीं प्रवने

ऋष्यमूकोगीरिर्यत्रनातिदूरेप्रकाशते यस्मिन्वसतिधर्मात्मा सुग्रीवोंशुमतः सुतः ७ नित्यंवा
लिभयात्रस्तश्चतुर्भिः सहवानरैः अहंत्वरेचतंद्रष्टुंसुग्रीवंवानरर्षभं ८ तदधीनंहिमेकार्यंसी॰
सीतायाःपरिमार्गणं इतिब्रुवाणंतंवीरंसौमित्रिरिदमब्रवीत् ९ गच्छावत्वरितंतत्रममापित्व
रतेमनः आश्रमात्ततस्तस्मान्निष्क्रम्य सविशांपतिः १० आजगामततःपंपांलक्ष्मणेनसहप्र
भुः समीक्षमाणःपुष्पाढ्यंसर्वतो विपुलद्रुमं ११ कोयष्टिभिश्चार्जुनकैः शतपत्रैश्चकीचकैः एतै
श्चान्यैश्चविहगैर्नादितंतद्वनंमहत् १२ सरामोविविधान्वृक्षान्सरांसिविविधानिच पश्यन्का
माभिसंतप्तोजगामपरमंह्रदं १३ सतामासाद्यवैरामोदूरात्पानीयवाहिनीं मतंगसरसं॰
नामह्रदंसमवगाहत १४ तत्रजग्मतुरव्यग्रौराघवौहिसमाहितौ सतुशोकसमाविष्टोरामो
दशरथात्मजः १५

नपंपानदीतिलभ्यते वाहिनीमित्यस्यधारिणीमित्यर्थोवा मतंगसरमित्याकारांतः तत्रपंपायामेवप्रदेशभेदोऽयंगापामपिकर्णिकेव १४

१५
१९९

श्लक्ष्णाः मृदुस्पर्शाः १७ कुवलयोद्घाटैः कुवलयसमूहैः कुथा गजास्तरणं चित्रकंबलाः २० अरविंदपद्मयो रक्तश्वेतविषयत्वेन भेदः २१ विल॥

विवेश नलिनीं रम्यां पंकजैश्च समावृतां तिलकाशोकपुंनागवकुलोद्दालकाशिनीं १८ रम्योपव
नसंबाधां रम्यसंबाधां रम्यसंपीडितोदकां स्फटिकोपमतोयाढ्यां श्लक्ष्णवालुकसंततां १७ मत्स्यक
च्छपसंबाधां तीरस्थद्रुमशोभितां सखीभिरिव संयुक्तां लताभिरनुवेष्टितां १८ किन्नरोरगगंध
र्वयक्षराक्षससेवितां नानाद्रुमलताकीर्णां शीतवारिनिधिं शुभां १९ पद्मसौगंधिकैस्ताम्रां शु
क्लां कुमुदमंडलैः नीलां कुवलयोद्घाटैर्बहुवर्णां कुथामिव २० अरविंदोत्पलवतीं पद्मसौगंधि
कायुतां पुष्पिताम्रवणोपेतां बर्हिणोद्घुष्टनादितां २१ स तां दृष्ट्वा ततः पंपां रामः सौमित्रिणा सह
विललाप च तेजस्वी रामो दशरथात्मजः २२ तिलकैर्बीजपूरैश्च वटैः शुक्लद्रुमैस्तथा पु
ष्पितैः करवीरैश्च पुंनागैश्च सुपुष्पितैः २३

लापस्सीताविप्रयोगादिति शेषः २२ शुक्लद्रुमो लोध्रः २३ ॥

श्री
वा रा
प्री
१३०

339 तस्यप्रसिद्दनदंसञ्जत्नाकरजोनामकस्यपुत्रोहरिर्वानरः २८ इत्युवाच श्रेतरांसीताशोके २८ उपसंहरति इतीतिश्रुन्नन्यचेतनः न्नासम्यत्रसीतायाः

ऋष्यमूकइतिख्यातश्चित्रपुष्पितपादपः हरिर्ऋक्षरजोनाम्नः पुत्रस्तस्यमहा
त्मनः २९ अध्यास्तेतंमहावीर्यःसुग्रीवइतिश्रुतः सुग्रीवमभिगच्छत्वंवानरे
न्द्रंनरर्षभ ३० इत्युवाचपुनर्वाक्यंलक्ष्मणंसत्यविक्रमः राज्यभ्रष्टेनदीनेन
तस्यामासक्तचेतसा कथंमयाविनासीतांशक्यंलक्ष्मणजीवितं ३८ इत्ये
वमुक्त्वामदनाभिपीडितःसलक्ष्मणंवाक्यमनन्यचेतनः विवेशपंपांन
लिनीमनोरमांतमुत्तमंशोकमुदीरयानः ३९

चेतनंविचिन्तयन्सः नलिनीभिर्मनोरमां पंपामतंगसरसप्रहेरावर्तिनीविपा २९ ॥

१३०

340 शुभदर्शं शुभदर्शकाननं यस्यां तां पंपां ददर्श सर्वं तत् इति शेषः विवेश च मतंगसरसा वच्छेदेनेति बोध्यम् ३॰ विराधादिकबंधांतानां हृ
स्वपदप्राप्तिं न विचारवत् दंडकारण्ये समेणागतिः ३१ इति श्रीरामाभिरामे श्रीरामीये रामायणतिलके आरण्यकांडे पंचसप्ततितमः सर्गः ७५

श्री॰
वारा
आरी
१७२

क्रमेण गत्वा प्रविलोकयन्वनं ददर्श पंपां शुभदर्शकाल
नाम् अनेकनानाविधपक्षिसंकुलां विवेश रामः सह
लक्ष्मणेन ३॰ इत्यार्षे रामायणे आरण्यकांडे पंचस
प्ततितमः सर्गः ७५ आर
ण्यकांडे समाप्तम् ॥

आरण्यकाण्डे वाल्मीकरामायणे समाप्तम् ॥ शुभं अस्तु सर्वजगताम् ॥ संवत् १९॰॰ १८ ॥ १९१८ ॥ १७२

आरण्यकांड ३
पत्रे १७२

४